वर्षम्-४
अङ्कः-१५
ISSN : 975-2676


# संस्कृतवार्ता

## राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५११३-१४ वैक्रमाब्दः २०६८-६९ पौष-शुक्ल ८- चैत्र शुक्ल ८ शकः १९३३-३४ जनवरी-मार्च, २०१२



विश्वसंस्कृतसम्मेलनावसरे प्रधानमन्त्रिभ्यः स्मृतिचिह्नं प्रयच्छन् आचार्यराधावल्लभत्रिपाठी


विश्वसंस्कृतसम्मेलनावसरे लोकार्पितानां ग्रन्थानां विषये चर्चां कुर्वन्तः श्रीकपिलसिब्बलवर्याः आचार्यराधावल्लभत्रिपाठी च


संस्कृतनाट्यमहोत्सवस्य उद्घाटनकार्यक्रमे भाषमाणः आचार्यराधावल्लभत्रिपाठी मञ्चे विशिष्टाः विद्वांसश्च



नाट्यमहोत्सवस्य पुरस्कारप्रदानोत्सवे मञ्चासीनाः विद्वांसः अतिथयश्च

## कुलपतिवाक्

संस्कृतवार्तायाः अयमङ्कः 'राष्ट्रीयमूल्याङ्कन एवं प्रत्यायनपरिषद्' (नेशनल एसेसमेण्ट एण्ड एक्रेडिटेशन काउंसिल) इत्यस्याः प्रवरसमितेः संस्थानस्य निरीक्षणाय परीक्षणाय च समागमनावसरे प्रकाशमायाति। अभूतपूर्वः खल्वयमवसरः। मूल्याङ्कनं प्रत्यायनं च शिक्षाजगति नव उपक्रमः। प्रत्येकं शिक्षासंस्थानं समाजस्य राष्ट्रस्य च कृते विशिष्टं किमपि दायित्वं बिभर्ति। अस्य दायित्वस्य पूर्तिः कथं कार्येत्यपि स्वयमेव अवलोकनीयम्। राष्ट्रीयमूल्याङ्कन-प्रत्यायनपरिषदा विधीयमाना मूल्याङ्कनस्य प्रत्यायनस्य च प्रक्रिया शिक्षासंस्थाने कार्यरतेभ्यः सर्वेभ्यो जनेभ्यः तैः स्वं स्वं दायित्वं कथं निर्व्यूढमिति आत्मावलोकनस्य आत्मपरीक्षणस्य च महान्तम् अवसरं प्रददाति। मूल्याङ्कनप्रत्यायनप्रक्रिययानया राष्ट्रियसंस्कृतसंस्थानस्य सारस्वतसाधना प्रगुणिता स्यादिति दृढं विश्वसिमः। राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः प्रवरसमितेः सर्वेषां सदस्यानां च हार्दं स्वागतं कुर्मः।

साम्प्रतिकेऽस्मिन् समये शिक्षाजगति नवीनं बहु उपक्रान्तम्। केषाञ्चिन्नवोपक्रमाणां कृते प्रयोगस्थलीयति राष्ट्रियसंस्कृतसंस्थानमपि। एतेषु उपक्रमेषु अनुसन्धानरतानां विद्यावारिधिच्छात्राणां कृते प्रशिक्षणं परीक्षा च, सर्वासु स्नातक-स्नातकोत्तरकक्षासु सेमेष्टरप्रणाली विकल्पाधारितगुणाङ्कप्रणाली आन्तरिकमूल्याङ्कनप्रणाली च महत्त्वमावहन्ति। संस्थानेन इमाः सर्वा नवीनाः प्रणाल्योऽङ्गीकृताः। ताभिः सह चिरकालात् प्रचलिता शास्त्रानुशीलनपरम्परा मूलग्रन्थानां स्वाध्यायश्चापि अविच्छिन्नत्वेन प्रवर्तेतामित्यत्रापि यत्न आहितः। विकल्पाधारितगुणाङ्कप्रणाली छात्राणां महते उपकाराय प्रकल्पेत इति मन्यामहे, यतो ह्यनया विविधज्ञानविज्ञानशाखासु वैदुषी अधिगन्तुं शक्येत।

सद्य एव संस्थानेन पञ्चदशं विश्वसंस्कृतसम्मेलनं समायोजितम्। संस्कृतजगति सर्वोच्चप्रतिष्ठास्पदं भवति सम्मेलनमिदम्। अस्मिन् पञ्चदशे विश्वसंस्कृतसम्मेलने द्वात्रिंशद्भ्यो देशेभ्यः प्रायो द्विशतं श्रेष्ठाः वैदेशिका विपश्चिदपश्चिमाः सम्मिलिताः, भारतस्य च सहस्रं विद्वांसोऽत्र भागमगृह्णन्। अचिरमेव संस्थानमेतस्मिन् सम्मेलने प्रस्तुतानां शोधलेखानां प्रकाशनम् अष्टादशसु खण्डेषु विधास्यति।

अस्मिन् विश्वसंस्कृतसम्मेलने अन्ताराष्ट्रियसंस्कृताध्ययनसमवायस्य प्रबन्धसमित्या साधारणसभया च राष्ट्रियसंस्कृतसंस्थानं संसदोऽधिनियमेन केन्द्रीय-अन्ताराष्ट्रियविश्वविद्यालय उद्घोषणीय इति सर्वसम्मत्या प्रस्तावोऽङ्गीकृतः। अस्य प्रस्तावस्य चरितार्थता अचिरमेव भवितेति आशास्महे।

अस्मिन् सम्मेलने आचार्यः कुटुम्बशास्त्री तृतीयाय अवधये अन्ताराष्ट्रियसंस्कृताध्ययन-समवायस्य अध्यक्षत्वेन चितः। अफ्रीकादेशीयः सुप्रसिद्धः पण्डितः जयन्द्रः सोनी अस्याः संस्थाया नवनिर्वाचितो महासचिवः। तथैव श्रीमान् पिनाल्टः कोषाध्यक्षपदमधिरूढः। एतेभ्यो गुणगरिमगरिष्ठेभ्यो विद्वद्वरेण्येभ्यो वर्धापनानि प्रयच्छामः। नवनिर्वाचितेन महासचिवेन जयन्द्र- सोनिवर्येण विद्युद्दूतः इति वैद्युतं पत्रं समारब्धम्। सर्वथा श्लाघनीयोऽस्य अध्यवसायः। विद्युद्दूतस्य प्रथमं स्फुरणं दृष्टम्। अयं विद्युद्दूतः संस्थानस्य दृश्यजालपुटेऽपि पठितुं शक्यते।

नवयुगेऽस्मिन् नवोपक्रमाणामवतारेषु जायमानेषु नवाध्यवसायार्थं सन्नह्यमानान् सर्वान् संस्कृतपरिवारजनानभिनन्दामः।

*–राधावल्लभः त्रिपाठी*

**मुख्यपरामर्शदाता**
आचार्यः राधावल्लभः त्रिपाठी
कुलपतिः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली


**परामर्शदातृमण्डलम्**
आचार्यः रमाकान्तशुक्लः
आचार्यः के.बी. सुब्बरायुडुः
डा. शुक्ला मुखर्जी
डा. रत्नमोहनझाः
कू. वेङ्कटेशमूर्तिः

**सम्पादकौ**
डा. रमाकान्तपाण्डेयः
डा. प्रफुल्लगडपालः

'संस्कृतवार्ता'-सम्बद्धं स्वीयाभिप्रायम्, अत्र प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल्-सङ्केतेन प्रेषयन्तु-
**samskritavarta@gmail.com**

**संस्कृतवार्ता**
राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्
ISSN : 975-2676

प्रकाशकः
कुलसचिवः
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,
नवदेहली-110058
011-28524993, 28521994, 28520977
e-mail : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in




## चतुर्थी पण्डितगौरीनाथशास्त्रिस्मृतिव्याख्यानमाला

कोलकातायां प्रतिवर्षमिव ऐषमः राष्ट्रियसंस्कृतसंस्थानप्रायोजिता चतुर्थी पण्डितगौरीनाथशास्त्रिस्मृतिव्याख्यानमाला नरेन्द्रपुरस्थ-रामकृष्णमिशनावासीयस्वयंशासितमहाविद्यालयपरिसरे आयोजिता। ०२.०२.२०१२ दिनाङ्के अपराह्णे महाविद्यालयस्य ई-श्रेणीगृहे आयोजितायाः अस्याः व्याख्यानमालायाः शुभारम्भः जातः अतिथिवरणेन। राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यराधावल्लभत्रिपाठी राङ्कव-पुष्पगुच्छादि प्रदाय अतिथीनां स्वागतं कृतवान्। कार्यक्रमस्य मुख्यातिथिः नरेन्द्रपुरीयरामकृष्णमिशनस्य सम्पादकः स्वामिसुपर्णानन्दमहाराजः राष्ट्रियसंस्कृतसंस्थानस्य कार्यक्रमान् प्रशंस्य पश्चिमबङ्गे संस्कृतस्य प्रचाराय संस्थानस्य इतोऽपि सहयोगः भवतु, इति प्रार्थितवान्। व्याख्यानमालायाः मुख्यवक्ता राष्ट्रियसंस्कृतसंस्थानस्य शास्त्रचूडामणिविद्वान् आचार्य-रमाकान्तशुक्लः संस्कृते अनूदितसाहित्यविषये स्वीयाभिप्रायं प्रकटितवान् पण्डितगौरीनाथशास्त्रिणः स्मृतिचारणेन सह तेनोक्तं यत्सम्पूर्णभारतवर्षस्य तात्कालिकं चित्रं वयं संस्कृतेनानूदितसाहित्येन अपि प्राप्तुं शक्नुमः। प्राचीनकालादारभ्य संस्कृतज्ञाः प्रसिद्धसाहित्यस्य अनुवादान् प्रस्तुतवन्तः। तदेव साहित्यमत्युत्तमं यत् संस्कृतेन अनूदितमिति वयं प्रमाणीकर्तुं शक्नुमः। शेक्सपियर-होमर-कबीर-गालिब-टालस्टॉय- प्रेमचन्द-रवीन्द्रनाथेभ्यः कोऽपि संस्कृतज्ञैः त्यक्तो नास्ति।' सभाध्यक्षः आचार्यः राधावल्लभत्रिपाठी उक्तवान् यत्, 'बृहत्कथायाः विभिन्नरूपान्तराणि संस्कृतज्ञानामनुवादकलामेव विशदीकुर्वन्ति। तदारभ्य प्रचलितेयं परम्परा विंशशतकस्यान्तिमपर्याये चरमकोटिमारूढा विश्वसंस्कृतपुस्तकमेलायाम्। विशेषतः अत्र शताधिकाः अनूदितग्रन्थाः लोकार्पिताः इति जानन्त्येव सुधियः, परन्तु रवीन्द्रनाथादीनामार्षकवीनामनुवादसमये अनुवादकैः जागरुकैर्भाव्यं नोचेत् ऋषेः विपरीतमेव अनुवदेत् अनुवादकः।' कार्यक्रमं संयोजितवान् डॉ. नारायणदाशः। कार्यक्रमे उपस्थिताः आसन् – प्रो. सीतानाथ आचार्यः, प्रो. नवनारायणवन्द्योपाध्यायः, डॉ. बनमालिबिश्वालः, डॉ. तन्मयकुमारभट्टाचार्यः, डॉ. सूर्यमणिरथः, डॉ. अजयकुमारमिश्रः, डॉ. धर्मेन्द्रकुमारसिंहदेवः, अशोककुमारव्यासः, राकेशदाशः, विश्वनाथस्वाईं, विवेकानन्दपाणिग्राही, चन्द्रशेखरदासवर्मा, सौमित्रः अधिकारी, खोखनभट्टाचार्यः, सम्पापाल इत्यादयः शतं प्रायाः विद्वांसः। नरेन्द्रपुरस्थरामकृष्ण-मिशनस्य अध्यापकानां, श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयस्य अध्यापकानां चाऽत्र विशेषः सहयोग आसीत्। श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयस्य व्याकरणाविभागाध्यक्षः डॉ. शशिभूषणमिश्रः धन्यवादैः अतिथीन् तर्पितवान्।



आचार्यरमाकान्तशुक्लाय पुष्पगुच्छं समर्पयन् आचार्यराधावल्लभत्रिपाठी

## मुक्तस्वाध्यायपीठस्य निदेशकत्वेन नियुक्तः डा. रमाकान्तपाण्डेयः

राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरे साहित्यविभागे सहाचार्यः डा. रमाकान्तपाण्डेयः मुक्तस्वाध्यायपीठस्य नूतननिदेशकत्वेन नवदेहलीस्थ-संस्थानमुख्यालये नियोजितः। डा. पाण्डेयः ६.२.२०१२ दिनाङ्के मुख्यालये पदस्यास्य दायित्वं स्वीकृतवान्।

मुख्यालयवार्ता




विश्वसंस्कृतसम्मेलनस्य उद्घाटनकार्यक्रमस्य किञ्चन दृश्यम्

## भव्यतया सम्पन्नं पञ्चदशं विश्वसंस्कृतसम्मेलनम्

भारतस्य राजधान्यां नवदेहल्यां ०५.०१.२०१२ तः १०.०१.२०१२ पर्यन्तं पञ्चदशं विश्वसंस्कृतसम्मेलनं सम्पन्नम् अभूत्। विज्ञानभवने सम्पन्नमिदं सम्मेलनं संस्कृतजगतः काचिद् विशिष्टा एव घटना वर्तते। सम्मेलनमिदं पेरिसस्थस्य अन्ताराष्ट्रियसंस्कृताध्ययनसमवायस्य सहयोगेन नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थानेन समायोजितम्।

पञ्चदशस्य विश्वसंस्कृतसम्मेलनस्यास्य पूर्वस्मिन् दिने ०४.०१. २०१२ दिनाङ्के 'पूर्वरङ्गः' इति नाम्ना कश्चन विशिष्टः कार्यक्रमः सम्पन्नः। इन्दिरागान्धीराष्ट्रियकलाकेन्द्रस्य भरतमण्डपे कार्यक्रमोऽयं प्रचलितः। विश्वसंस्कृतसम्मेलनाङ्गतया आयोजिताः अनौपचारिकाः सांस्कृतिककार्यक्रमाः प्रदर्शिन्यः संस्कृतपुस्तकमेला च अत्रैव आयोजिताः अभवन्। पूर्वरङ्गे सारस्वतातिथित्वेन भारतशासनस्य पूर्वकेन्द्रीयमन्त्री राष्ट्रियसंस्कृतसंस्थानपूर्वोपाध्यक्षा च डॉ. (श्रीमती) सरोजिनी महिषी समुपस्थिता आसीत्। नवदेहलीस्थराष्ट्रीयशैक्षिकयोजना-प्रशासनविश्वविद्यालयस्य कुलाधिपतिः डॉ. कल्याणकुमारचक्रवर्ती तत्र आध्यक्ष्यम् निरवहत्। वैदिकमङ्गलाचरणेन समारब्धेऽस्मिन् कार्यक्रमे वैदिकविद्यासम्बद्धानां विदुषां सम्माननमपि विशिष्टैः आचरितम्। कार्यक्रमाङ्गतया इन्द्रध्वजोत्सवस्य प्रस्तुतिरपि जाता। प्रस्तुतिरियम् अत्यन्तं मनोहारितया प्रस्तुता सर्वैः प्रशंसिता च।

ततः 'विश्ववारा'-प्रदर्शिन्याः उद्घाटनं श्रीचिन्मय आर्. गरेखानः (अध्यक्षः इन्दिरागान्धीराष्ट्रियकलाकेन्द्रन्यासः) अथ च संस्कृतपुस्तकमेलापकस्य उद्घाटनं श्रीरमाकान्तगोस्वामी (उद्योग-श्रम-निर्वाचनमन्त्री, दिल्लीशासनम्) अकुरुताम्। परमटॉमनेकनिर्देशितस्य रासयात्रेति चलचित्रस्य प्रथमप्रदर्शनम् (Premier) अपि अत्र जातम्। इत्येवं पूर्वरङ्गाभिधेयोऽयं कार्यक्रमः सफलतया सम्पन्नः।

पञ्चदश-विश्वसंस्कृतसम्मेलनस्यास्य उद्घाटन-कार्यक्रमः ०५.०१.२०१२ दिनाङ्के विज्ञानभवने प्लेनरीहालित्याख्यमण्डपे आयोजितमभूत्। भारतस्य प्रधानमन्त्रिणः डॉ. मनमोहनसिंहमहोदयाः कार्यक्रमस्यास्य समुद्घाटनं विहितवन्तः। मानवसंसाधनविकास-सञ्चारसूचनाप्रौद्योगिकीमन्त्रिणः श्रीकपिलसिब्बलमहोदयाश्च कार्यक्रमस्य आध्यक्ष्यमकुर्वन्।

'संस्कृतं भारतस्य आत्मा अस्ति' इत्यनेन वाक्येन उद्घाटनभाषणं कुर्वद्भिः प्रधानमन्त्रिभिः संस्कृतं 'भारतीयप्रज्ञायाः अक्षयकोशत्वेन वर्तते' इति निरूपितम्। तैरुक्तं यत् संस्कृतं सहस्रवर्षेभ्यः मानवसभ्यतायाः प्रेरणास्रोतः अस्ति। प्रधानमन्त्रिवर्यैः संस्कृतस्य वैज्ञानिकपरम्परायाः उल्लेखं कुर्वद्भिः विश्वासः प्रकटितः यत् आधुनिकयुगे ज्ञान-विज्ञानक्षेत्रेऽपि अस्य सदुपयोगो भवेदिति। कार्यक्रमस्य अध्यक्षा मानवसंसाधनविकासमन्त्रिणः श्रीकपिलसिब्बलवर्याः संस्कृतं ज्ञानस्य महासागरं निरूपयन्तः आशां प्राकटयन् यत् पञ्चदशेऽस्मिन् विश्वसंस्कृतसम्मेलने अस्य महासागरस्य मन्थनेन नूत्नानि रत्नानि प्रकटीभविष्यन्तीति। ते उक्तवन्तः यत् संस्कृतं न केवलं शास्त्रीया (Classical) भाषा वर्तते, अपितु इयं काचित् आधुनिकी भाषाऽप्यस्ति। विदेशेषु केषुचित् विद्यालयेषु संस्कृताध्ययनम् अनिवार्यं जातं वर्तते। ते 'मारिशसदेशस्य संसदा संस्कृत-अनौपचारिक-शिक्षा-अधिनियमः न्यस्तः' इति सूचितवन्तः। अवसरेऽस्मिन् प्रधानमन्त्रिणा केचन ग्रन्था अपि लोकायाऽर्पिताः।




उद्घाटनभाषणं कुर्वन्तः मान्याः प्रधानमन्त्रिणः




विशिष्टव्याख्यानसत्रावसरे ग्रन्थलोकार्पणं कुर्वन्तः विद्वांसः

उद्घाटनसत्रान्तरं विख्यातायाः विदुष्याः डॉ. कपिलावात्स्यायनवर्यायाः आध्यक्ष्ये सम्पन्ने विशिष्टव्याख्यानसत्रे डॉ. अशोक-अकलूज़्करः डॉ. लोकेशचन्द्रः च विशिष्टव्याख्यानं व्यधात्। अन्ते डॉ. कपिलावात्स्यायनमहोदयायाः व्याख्यानमपि जातम्।

यथोक्तं पूर्वं विश्वसंस्कृतसम्मेलनाङ्गतया नैकाः प्रदर्शिन्यः, संस्कृतपुस्तकमेलापकः संस्कृतनाट्योत्सवः ग्रन्थलोकार्पणसमारोहश्च आयोजिताः। 'विश्ववारा'-नाम्ना काचित् प्रदर्शिनी राष्ट्रियसंस्कृतसंस्थान-इन्दिरागान्धीराष्ट्रियकलाकेन्द्रयोः संयुक्तोपक्रमे इन्दिरागान्धीराष्ट्रियकलाकेन्द्रस्य माटीघरनामके स्थले संस्थापिता। प्रदर्शिन्यामस्यां संस्कृतपाण्डुलिपयः, संस्कृताभिलेखाः, याज्ञिकपात्राणि संस्कृतं विज्ञानं च प्रदर्शितानि।

संस्कृतनाट्योत्सवोऽपि अत्र आयोजितः। ०५.०१.२०१२ दिनाङ्कादारभ्य प्रत्यहं सायं ७.३० वादने क्रमशः कूटियाट्टं, नाङ्गीयारकूट्टु, कथकली, यक्षगानम्, अङ्कियानाटः मणिपुरीरासः च विभिन्नकाव्यानां रूपकाणां च आश्रयेण प्रदर्शिता अभवन्। संस्कृतपुस्तकमेला अस्य कार्यक्रमस्य विशिष्टम् आकर्षणम् आसीत्। अत्र आहत्य १०५ पुस्तकापणाः योजिताः। मेलायाः प्रदर्शिन्याश्च लोकप्रियतां दृष्ट्वा सम्मेलनस्य समाप्त्यनन्तरमपि ११.०१.२०१२ दिनाङ्के पुस्तकमेलेयं अनुवर्तिता तथैव 'विश्ववारा-प्रदर्शिनी' अष्टौ दिनानि नाम १८.०१.२०१२ दिनाङ्कं यावत् इतोऽपि अग्रे सारिता।

संस्कृतशास्त्राणां विविधविषयानाश्रित्य ०५.०१.२०१२ तः १०.०१.२०१२ दिनाङ्कं यावत् विभिन्नसत्राणि विज्ञानभवने प्रचलितानि।

विभिन्नसत्राणां विषयाः तत्समन्वयकाः च इत्थम् आसन्-



कयोश्चित्सत्रयोः विमर्शं कुर्वन्तः विद्वांसः



### सत्रविषयाः तत्समन्वयकाश्च

१. अनुष्ठानविद्या - टी.एस. रुक्मिणी
२. अभिलेखशास्त्रम् - रामचन्द्रन् नागस्वामी, के. के. चक्रवर्ती, अनूपपाण्डेयः
३. आधुनिकसंस्कृतसाहित्यम् - रामकरणशर्मा, जुर्गनहन्नेदरः, रमाकान्तशुक्लः
४. इतिहासौ पुराणानि च - अल्फ हिल्टेबिटेलः, एडमबोलेस्, साइमनब्राडबेकः, राजेन्द्रनाणावटी
५. काव्यम् अलङ्कारश्च - आर. पी. गोल्डमैन्, नतालिया लिडोवा, सी. राजेन्द्रन्
६. जैनविद्या - पीटरफ्लुगेलः, जयन्द्रसोनी, जे. बी. शाहः
७. तन्त्रम् आगमाश्च - नवजीवनरस्तोगी, राफेलटोरेल्ला, मार्कडिस्कोव्स्की, कमलेशदत्तत्रिपाठी, दिवाकराचार्यः
८. दर्शनानि - कमलेश्वरभट्टाचार्यः, आस्करपुजोलः, गोदावरीशमिश्रः
९. धर्मविद्या - बेट्टीनाबौमेरः, अरविन्दशर्मा
१०. धर्मशास्त्रम् अर्थशास्त्रं च - डोनाल्डडेविसः, मानबेन्दुबनर्जी
११. पाण्डुलिपिविज्ञानम् - विजयशङ्करशुक्लः
१२. प्रौद्योगिके जगति संस्कृतम् - के. वी. रामकृष्णमाचार्युलुः, नवज्योतिसिंहः, माइकलपेराल्टा
१३. बौद्धविद्या - शोई ईछीमुरा, चिरापटप्रपण्ड्यविद्यः
१४. भाषाशास्त्रम् - पीरे-सिल्वैनफिलीयोझा, जॉन ई. एम. हाऊबेन, एस. पी. नारङ्गः, सीनिरुद्धदाशः
१५. वेदः - हंसहेनरीचहॉक, गयाचरणत्रिपाठी, श्रीकान्त-बाहुलकरः, सन्निधानं सुदर्शनशर्मा
१६. व्याकरणम् - जार्जकार्डोना, सरोजा भाटे, दीप्तित्रिपाठी
१७. संस्कृतम् एशियाद्वीपस्य भाषाः साहित्यं च - राबर्ट ज़ाइडेनबोसः, यिगलब्रोन्नरः, पङ्कजचान्दे
१८. संस्कृतं विज्ञानं च - पी. सी. मुरलीमाधवन्, के. रामसुब्रह्मण्यन्

### विशिष्टचर्चासत्राणां विषयाः समन्वयकाः च

१. आधुनिके जगति नाट्यशास्त्रम् - राधावल्लभत्रिपाठी
२. इतिहासकाव्ययोः वैद्युतीयं समायोजनम् - रामकरणशर्मा, लेसमोर्गनः
३. तन्त्रागमपरम्परासु प्रतिष्ठापनप्रयोगाः - दिवाकराचार्यः
४. दक्षिणपूर्वैशियादेशेषु संस्कृतशिलालेखाः - डोमिनिकगुडालः अमरजीवलोचनः
५. पाणिनेः पुनर्मीमांसा - रामनाथशर्मा
६. पाण्डुलिपयस्तासां बौद्धिकं संरक्षणं च - विजयशङ्करशुक्लः
७. विशिष्टो विमर्शः - भारतीय दार्शनिकसाहित्ये योगस्य सीमानः - स्टुअर्ट सरबेकरः, गेराल्डजेम्सलार्सनः
८. वैश्विकपरिप्रेक्ष्ये संस्कृतम् - वी. आर. पञ्चमुखी
९. शैवदर्शनम् - लिन बानसटबौडन जुदीत टोरजसोर्क
१०. संस्कृतविज्ञानग्रन्थानां पुनर्नवावलोकनम् - पी. सी. मुरलीमाधवन्, के. रामसुब्रह्मण्यन्
११. संस्कृतव्याकरणभाषाशास्त्रयोः प्रतिदर्शाः सिद्धान्ताश्च - जॉन ई. एम. हाउबेन
१२. संस्कृतशिक्षणे नवाचाराः - चमू कृष्णशास्त्री



विश्वसंस्कृतसम्मेलनस्य समापनसमारोहे भाषमाणः डा. कर्णसिंहः

उपर्युक्तसत्रेषु 'वेद'सत्रे विशेषतया ग्रीकदेवशास्त्रस्य परिप्रेक्ष्ये वेदानां विषये चर्चा जाता। वैदिकसाहित्यस्य कालस्य अवधारणा, वैदिकावतारपुरुषः, संस्कारः तन्महत्त्वं, जलवायुः, कृषिविज्ञानं, भौतिकविज्ञानं चेति विषया अपि वेदानाम् आलोके अत्र आलोचिताः। 'भाषाविज्ञान'सत्रे फ्रेञ्चव्याकरणं पाणिनीयव्याकरणं च, भाषाविज्ञानस्य नूतनसिद्धान्ताः संस्कृतभाषाविज्ञानं च, सङ्गणकीयभाषाविज्ञानम्, आधुनिकभारतीयभाषा-विज्ञानस्य तुलनात्मकमध्ययनं, भर्तृहरेः व्याकरणदर्शनस्य महत्त्वम् इत्येते विषयाः परामृष्टाः।

'महाकाव्यं पुराणं च' इत्यस्मिन् सत्रे प्राचीनभौगोलिकस्थलानि, भूगोलं, महाभारते अवतारवादस्य अवधारणा, भारतीयमहाकाव्येषु ग्रीकस्रोतसां विषये च चर्चाऽभवत्। 'तन्त्रम् आगमा'श्चेति सत्रमपि अत्यन्तं महत्त्वपूर्णमासीत्। एतस्यान्तर्गतं तन्त्रपरम्परायाः सामाजिकं दार्शनिकं च महत्त्वं प्रतिपादितमभवत्। 'काव्यं, नाट्यं सौन्दर्यशास्त्रञ्च' इत्यस्मिन् सत्रे सङ्गीत-सौन्दर्यशास्त्रयोः नूतनपाण्डुलिपीनां तासां संस्करणानां च विषये चर्चा प्रवृत्ता। संस्कृतकाव्यशास्त्रस्य अवधारणा इत्यस्मिन् विषयेऽपि सत्रेऽस्मिन् विमर्शो जातः। 'संस्कृतम् एशियाद्वीपस्य भाषाः साहित्यं च' इति सत्रमिदं प्रथमतया विश्वसंस्कृतसम्मेलनेऽस्मिन् समायोजितमभूत्, यस्मिन् संस्कृतस्य ख्मेर-थाईसदृशैशियाद्वीपीयभाषाणाम् अन्तःसम्बन्धविषये कानिचन अतीव महत्त्वपूर्णानि तथ्यानि प्राकाश्यम् आगतानि। सत्रेऽस्मिन् भारतीयभाषाणां तत्सम्बद्धानाम् उपभाषाणां च विषयेऽपि महत्त्वपूर्णानि शोधपत्राणि प्रस्तुतानि।

'संस्कृतं विज्ञानं च' इत्यस्मिन् सत्रे 'संस्कृतस्य मूलग्रन्थेषु तकनीकीमूलपाठानां साम्प्रतिकवैज्ञानिकयुगे औचित्यम्' इत्येतादृशशोधपत्राणां माध्यमेन संस्कृस्य वैज्ञानिकत्वं प्रतिपादितमभवत्। आयुर्वेद-बीजगणित-धातुविज्ञान-जलसंसाधनतन्त्र-प्रभृतिविषयाः संस्कृतशास्त्रेषु कथमुल्लिखिताः सन्ति इतीमे अंशाः सत्रेऽस्मिन् प्रकटिताः अभवन्। आधुनिके काले विज्ञानस्य विविधेषु प्रभागेषु संस्कृतज्ञानं समस्यासमाधानकारकं भवतीति विषयोऽपि अत्र भृशं प्रतिपादितः। संस्कृतशास्त्रेषु पर्यावरणविषये अवधारणा चेतना च इत्यस्मिन् विषयेऽपि सत्रेऽस्मिन् चर्चा जाता। बौद्धधर्मस्य सार्वभौमिकत्वविषये अत्र बौद्धाध्ययनसत्रे काचित् गभीरा चर्चा समपद्यत। अहिंसावाद-शान्तिवादयोः महत्त्वविषयेऽपि पर्याप्तं विमर्शः सत्रेऽस्मिन् समभवत्। 'पाण्डुलिपिविज्ञान'सम्बद्धे सत्रे कासाञ्चन विलुप्तपाण्डुलिपीनां सूचना समुपलब्धा। पाण्डुलिपिसंरक्षणविषयकसिद्धान्तेषु व्यापको विमर्शः सत्रेऽस्मिन् समुपस्थापितो जातः।

एतदतिरिच्य भारतशास्त्रविषये प्राच्यविद्याविषये च बहवो नूतनाः अनालोचितविषयाः प्राथम्येन सम्मेलनेऽस्मिन् चर्चिताः अभवन्। दक्षिणपूर्वैशियाद्वीपस्य नैकेषु देशेषु विद्यमानानां संस्कृतस्य अनालोचितशिलालेखानां विषये अपि सत्रेऽस्मिन् चर्चा जाता। संस्कृताध्ययनस्य नवाचारविषयके विशेषसत्रे संस्कृतशोधपद्धतिषु विचारा जाताः। 'आधुनिकयुगे नाट्यशास्त्र'मिति विशिष्टसत्रे नाट्यशास्त्रस्य ऊर्जस्वितायाः आकलनं वैश्विकरङ्गमञ्चस्तरे जातम्। सम्मेलनेऽस्मिन् आचार्यवेम्पटिकुटुम्बशास्त्री अन्ताराष्ट्रियसंस्कृतसमवायस्य अध्यक्षत्वेन पुनरपि चितोऽभवत्। आचार्यजयन्द्रसोनी महासचिवत्वेन आचार्यपिनाल्टः च कोषाध्यक्षत्वेन चितौ।

विश्वसंस्कृतसम्मेलनस्यास्य समापनसमारोहः १०.०१.२०१२ दिनाङ्के सायं ६.०० वादने प्रवृत्तः। समारोहेऽस्मिन् मुख्यातिथित्वेन सांसदः भारतीयसांस्कृतिकानुसन्धानपरिषदध्यक्षश्च डॉ. कर्णसिंहः, अध्यक्षत्वेन दिल्लीप्रदेश-मुख्यमन्त्री श्रीमती शीलादीक्षित च समुपस्थितौ आस्ताम्। दिल्लीविधानसभाध्यक्षः श्रीयोगानन्दशास्त्री, दिल्लीशासनस्य स्वास्थ्यमन्त्री श्रीमती डॉ. किरणवालिया, श्रमोद्योगनिर्वाचनमन्त्री डॉ. रमाकान्तगोस्वामी चापि अत्र समुपस्थिताः आसन्।

पञ्चदशविश्वसंस्कृतसम्मेलन - मिदम् अन्ताराष्ट्रियमैत्रीभावस्य वैश्विकबन्धुत्वस्य च किञ्चन महद् आयोजनमिति राष्ट्रस्य किमपि गौरवमेव। वैश्विकस्तरे संस्कृत-विद्वद्भिः अनुसन्धानस्य बौद्धिक-अस्मितायाश्च संस्कृतविद्यया संवर्धनं कृतमिति अस्य सम्मेलनस्य साफल्यम् उद्घोषयति।



## अन्ताराष्ट्रियसंस्कृताध्ययनसमवायस्य साधारणसभायां समुपस्थापिताः प्रस्तावाः

१५विश्वसंस्कृतसम्मेलनावसरे १० जनवरी, २०१२ दिनाङ्के प्रवृत्तायां १५विश्वसंस्कृतसम्मेलनस्य अन्ताराष्ट्रियसंस्कृताध्ययनसमवायस्य च साधारणसभायाम् इमे प्रस्तावाः अङ्गीकृताः –

१. विगत-द्विचत्वारिंशद्वर्षेभ्यः राष्ट्रिय-अन्ताराष्ट्रियस्तरे संस्कृताध्ययनस्य उन्नयनार्थं राष्ट्रियसंस्कृतसंस्थानेन क्रियमाणं योगदानमुपलक्ष्य संसदोऽधिनियमेन राष्ट्रियसंस्कृतसंस्थानम् 'अन्ताराष्ट्रियकेन्द्रीयसंस्कृतविश्वविद्यालयत्वेन समुद्घोषयेत्' इति अन्ताराष्ट्रियसंस्कृताध्ययनसमवायः भारतशासनं प्रार्थयते।

२. १५विश्वसंस्कृतसम्मेलनस्य अन्ताराष्ट्रियसंस्कृताध्ययनसमवायस्य च साधारणसभा संस्कृतायोगस्य स्थापनार्थं भारतशासनं दृढतया संस्तौति। आयोगोऽयं १९५६ तमस्य प्रथमसंस्कृतायोगस्य कार्याणि अद्यतनानि पूर्णानि सातत्ययुक्तानि च कुर्यात्। तत्र पूर्णतां सातत्यं च सम्पादयेत्।

३. १५विश्वसंस्कृतसम्मेलनस्य साधारणसभा भारतशासनं 'राष्ट्रियपाण्डुलिपिमिशन' इत्याख्यसंस्थायाः संस्थापनार्थं धन्यवादैः सभाजयति अथ च भारतशासनं प्रति राष्ट्रियपाण्डुलिपिमिशनस्य अस्तित्वरक्षणार्थं निश्चितं पञ्चवर्षीयसमयावधिं वर्धयितुं प्रार्थयति। भारते हस्तलिखितग्रन्थानां बाहुल्यं तावदधिकं वर्तते यत् ५-१० वर्षात्मके समयसीम्नि सम्पादयितुं न शक्यते। यतो हि प्रतिवर्षं नवा अज्ञातप्रायाः पाण्डुग्रन्थाः प्राप्यन्ते।

ज्ञातमातृकाणां तथा च व्यक्तिगत-सार्वजनिकसंग्रहेषु सम्भावितपाण्डुलिपीनां व्यापकसूचीनिर्माणात्मकं बृहत् कार्यम् इतोऽपि आरब्धव्यमेव अस्ति। प्रमुखपाण्डुलिपिग्रन्थालयानां ग्रन्थसूच्यः कालबद्धाः सन्ति, ताः वस्तुस्थितिं न प्रदर्शयन्ति। विशेषतो भारतस्य वैज्ञानिकस्वत्वस्य बौद्धिकसम्पदोऽधिकारस्य च कृते एतदतीव महत्त्वपूर्णमस्ति यत् पाण्डुग्रन्थानां स्थानाङ्कने संरक्षणे अध्ययने सातत्यं स्थायित्वं च भवेत्। 'राष्ट्रियपाण्डुलिपिमिशन' इति संस्थायै स्थायित्वप्रदानमेव बहुप्रतिभासम्पन्नकार्यशक्तेः सर्जनं करिष्यति, यत्खलु भारतीयपाण्डुलिपिभाण्डागाराणां प्रकृत्यै स्थित्यै च अपेक्षितं वर्तते।

४. वैदेशिक-विनिमय-न्यूनताकाले भारतीयाः ग्रन्थालयाः गभीरतया प्रभाविताः अभवन् यतो हि संस्कृतं भारतेतरदेशेष्वपि समधिकतया अधीयमाना भारतीया भाषा वर्तते। सेयं संस्कृतभाषा पुस्तकालयेषु नैकेषां ज्ञानविधानां कृते उपयोगिनी वर्तते। सामान्यतः बहूनां संस्कृतसम्बद्धवैदेशिकप्रकाशनानां क्रयणेऽसामर्थ्यं पुस्तकालयेषु पङ्गुतां जनयति। १५विश्वसंस्कृतसम्मेलनस्य अन्ताराष्ट्रियसंस्कृताध्ययनसमवायस्य च साधारणसभा यथाशीघ्रम् एतां चिन्तोत्पादिकां समस्यां परिहर्तुं भारतसर्वकारं संस्तौति। एतस्याः स्थितेः अध्ययनार्थं भारतस्य विभिन्नप्रान्तेभ्यः एकस्याः विशेषज्ञसमितेः स्थापना कर्तव्या। इयं समितिः आवश्यकाभिलेखीयसंसाधनानां (ग्रन्थ-पत्रिका-आङ्किकग्रन्थ-प्रभृतीनां) केन्द्रसंख्यायाः तदवस्थितेश्च संस्तुतिं कुर्यात्। प्रतिरूपप्रक्रियां निवारयितुं कार्यशक्तेः समधिकतरमभ्युगमाय च भारते प्रतिप्रान्तं प्रयासाः विधेयाः। प्रमुखवैदेशिकप्रकाशनाभिकरणैः संस्थानैश्च साकं सहभागिताविनिमयनियमाः कल्पनीयाः। नियमेन तेषां कार्याणां नियमितं व्यापकं च परीक्षणं भवेत्। पार्श्वस्थपुस्तकालयानां संगणकसम्बन्धं समधिकतरं प्रोत्साहयेत्। संस्कृतक्षेत्रे अद्यतनवैदेशिकोपलब्धीनां विषये भारतीयैः दत्तावधानैः भाव्यम्। तथैव भारतीयसंस्कृतप्रकाशनानां विषये विश्वस्तरे विज्ञापनमपि अस्याः समितेः उद्देश्यं स्यात्।

५. १५विश्वसंस्कृतसम्मेलनस्य अन्ताराष्ट्रिय-संस्कृताध्ययनसमवायस्य च साधारणसभा भारतसर्वकारं दृढं विनिवेदयति यत् सः भारतस्य विभिन्नराज्येषु केन्द्रशासितप्रदेशेषु च स्थितानां संस्कृतशिक्षणसंस्थानां (प्राच्यविद्यालय-महाविद्यालय-पाठशालादीनां) संरक्षणे यथाशीघ्रं प्रयत्नान् कुर्यात्। अधुना भारते बहव्यः संस्कृतसंस्थाः पिहिताः पिहितप्रायाश्च सन्ति। इयं स्थितिः तेषु राज्येषु सविशेषं दृश्यते यत्र प्राथमिक-माध्यमिकविद्यालयेषु नियन्त्रणात्मकभाषाशिक्षणनीतयः निर्धारिताः सन्ति। भारतस्य एकतायाः भारतीयसंस्कृतेश्च संरक्षणाय इदं नितान्तम् आवश्यकमस्ति यत् एतादृशाः क्रियाकलापाः तत्परिणामाश्च यथासम्भवं रुद्धा भवन्तु।

६. १५विश्वसंस्कृतसम्मेलनस्य अन्ताराष्ट्रिय-संस्कृताध्ययनसमवायस्य च साधारणसभा १५विश्वसंस्कृतसम्मेलनस्य कार्यवृत्तं प्रकाशयितुं राष्ट्रियसंस्कृतसंस्थानस्य प्रार्थनां कृतज्ञतापूर्वकं स्वीकरोति।

## चतुर्थराष्ट्रियसंस्कृतनाट्यमहोत्सवः


नाट्यमहोत्सवावसरे दीपं प्रज्वालयन् आचार्यराधावल्लभत्रिपाठी

नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षं वसन्तर्तुकाले त्रिदिवसीयराष्ट्रियसंस्कृत-नाट्यमहोत्सवः आयोज्यते। अस्मिन् वर्षे आयोजनमिदं ०९-११ मार्च, २०१२ मिते काले भोपालपरिसरस्य भवभूतिप्रेक्षागारे सुसम्पन्नतां यातम्। वर्तमानशिक्षासत्रादारभ्य भोपालपरिसरे नाट्यशास्त्रानुसन्धानकेन्द्रस्य स्थापना जाता। नाट्यमहोत्सवे आमन्त्रितो राष्ट्रस्य विशिष्टनाट्यशास्त्रीयो विद्वान् त्रिवेन्द्रमिति नगरस्थस्य 'सोपानम्'-संस्थायाः निदेशकः पद्मभूषण-कावालम् नारायणपणिक्करः ०९ मार्च, २०१२ दिनाङ्के नाट्यशास्त्रानुसन्धानकेन्द्रस्य उद्घाटनमकरोत्। राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यराधावल्लभत्रिपाठी अत्र सत्राध्यक्षः आसीत्। पद्मभूषण-कावालम् नारायण पणिक्करः 'केरले दृश्यकला रङ्गप्रयोगश्च' (Performing Arts in Kerala and his own theater) इत्यस्मिन् विषये उद्घाटनभाषणमकरोत्। सत्रेऽस्मिन् भोपालस्य वरिष्ठस्य साहित्यकारस्य श्री उदयनवाजपेयिवर्यस्य 'भवभूतिदृष्ट्यां उत्तरामचरितस्य हिन्दीमञ्चनम्' विषये सारस्वतं व्याख्यानं सम्पन्नम्।

नाट्यशास्त्रीयविशिष्टव्याख्यानान्तर्गततया अपरस्मिन् दिने १०.०३.२०१२ दिनाङ्के पूर्वाह्णे 'आगमपरम्परा नाट्यशास्त्रं च' इत्यस्मिन् विषये वाराणसीस्थ-इन्दिरागान्धीराष्ट्रियकलाकेन्द्रस्य निदेशकः आचार्यकमलेशदत्तत्रिपाठी व्याख्यानमकरोत्। ततः 'प्रयोगः शास्त्रं च' इत्यस्मिन् विषये नवदेहलीस्थ-राष्ट्रियनाट्यविद्यालयस्य आचार्यस्य श्री के.एस. राजेन्द्रस्य महत्त्वपूर्णं व्याख्यानं जातम्। के.एन. पणिक्करः अत्र सत्राध्यक्षः आसीत्।

द्वयोः अपि दिनयोः व्याख्यानसत्रानन्तरं कुलपतिमहोदयस्य आध्यक्ष्ये केन्द्रीयलोकनिर्माणविभागाधिकारिभिः नाट्यकेन्द्रपरामर्शदातृमण्डलसदस्यैश्च सह तत्सम्बद्धे विषये विचार-विमर्शो जातः। महोत्सवस्य तृतीयेऽन्तिमे च दिने ११.०३.२०१२ दिनाङ्के भोपालपरिसरस्य वार्षिकोत्सवः समायोजितः। कार्यक्रमेऽस्मिन् पद्मश्रीः आचार्यरमेशचन्द्रशाहः मुख्यातिथित्वेन आचार्यराधावल्लभत्रिपाठी अध्यक्षत्वेन सभां शोभितवन्तौ। अवसरेऽस्मिन् राष्ट्रियसंस्कृतसंस्थानकुलसचिवः आचार्यः के.बी. सुब्बरायुडुः परियोजनाधिकारी डॉ. शुक्लामुखर्जी च विशिष्टातिथित्वेन समुपस्थितौ आस्ताम्।

नाट्यमहोत्सवस्यास्य प्रधानतमाकर्षणं रङ्गमञ्चप्रस्तुतयः आसन्। प्रत्यहमपराह्णे ०३:०० वादने त्रिष्वपि दिनेषु अत्यन्तं भव्यतया नाटकानि मञ्चितानि। प्रथमे दिने ०९.०३.१२ दिनाङ्के मुम्बईस्थ-नृत्योदय-संस्थायाः निदेशिका जयश्रीः राजगोपालन् नाट्यशास्त्रीय-नृत्तकरणस्य अङ्गहाराणां च सोदाहरणं प्रदर्शनमकरोत्। प्रदर्शनेऽस्मिन् तत्पुत्री श्रीमती ऐश्वर्या नृत्ये तत्सहयोगमाचरितवती। प्रदर्शनेऽस्मिन् नाट्यशास्त्रस्थ-श्लोकानां सस्वरपाठः तदनुरूपं प्रदर्शनं च सर्वानपि प्रेक्षकान् आश्चर्यचकितान् अकरोत्। ततः अपराह्णे ०४:३० वादने भोपालस्य नाट्यशास्त्रानुसन्धानकेन्द्रस्य कुशीलवाः राधावल्लभत्रिपाठिप्रणीतस्य 'मशकधानीप्रहसन'स्य नूतनतया मञ्चनमकुर्वन्। तदनन्तरं कावालम् नारायणपणिक्करमहाभागेन मलयालमभाषया विरचितस्य डा. उषया अनूदितस्य च 'कलिवेशनाटक'स्य सोपानम्-कलाकारैः मञ्चनं विहितम्। एताः प्रस्तुतीः दृष्ट्वा दर्शकाः तासां भूरिशः प्रशंसामकुर्वन्।



मशकधानी-प्रहसनस्य किञ्चन दृश्यम्

१०.०३.२०१२ दिनाङ्के अपराह्णे ०४:०० वादने भोपालपरिसरच्छात्रैः 'प्रसन्नराघवम्' भोपालस्थ-विहानथियेटरग्रुपसंस्थया धर्मवीरभारती-प्रणीतकाव्याधारितं 'कनुप्रिया' चेति प्रस्तुतिद्वयं मञ्चितम्। 'कनुप्रिया' इति प्रस्तुतिः नूतनप्रयोगेण मञ्चे प्रयुक्ता अत्यन्तं प्रशंसां कृतवन्तः सहृदयाः। अन्ते, समीक्षकैः नाट्यप्रयोगस्यास्य निदेशकः सौरभगौतमः साधुवादैः सभाजितः।

तृतीये दिने ११.०३.२०१२ दिनाङ्के अपराह्णे ०३:०० वादने इलाहाबादस्थायाः समानान्तरसंस्थायाः कलाकारैः आचार्यराधावल्लभत्रिपाठिप्रणीतस्य 'सुशीला'नाटकस्य मञ्चनं विहितम्। ततः राष्ट्रियसंस्कृतसंस्थानस्य शृङ्गेरीस्थ-राजीवगान्धीपरिसरच्छात्रैः कविवरश्रीरामपाणिप्रणीतस्य 'सीताराघव'स्य नाटकस्य नितान्तं सजीवं मञ्चनमकारि। इत्येवं चतुर्थेऽस्मिन् राष्ट्रियसंस्कृतनाट्यमहोत्सवे त्रिदिवसीयायोजने आहत्य षड्नाटकानां रङ्गप्रयोगः सहृदयैः समालोकितः।

ततः समायोजिते समापनसमारोहे भोपालस्य प्रयोगसंस्थायाः रङ्गनिर्देशकः आचार्यः सतीशमेहता मुख्यातिथिरूपेण समुपस्थितः। अवसरेऽस्मिन् विशिष्टातिथित्वेन ग्वालियरस्य नाट्यायनसंस्थायाः निदेशकः डॉ. कमलवशिष्ठः सभां सम्बोधितवान्। परिसरप्राचार्यः आजादमिश्रः सभाध्यक्षत्वेन वेदिकायाम् उपस्थितः आसीत्। अवसरेऽस्मिन् प्रतिभागिनः सर्वेऽपि कुशीलवाः, नाट्यनिर्देशकाः नाट्यशास्त्रविद्वांसश्च सम्मानिताः।

## राष्ट्रियसंस्कृतसंस्थाने होलिकामङ्गलमिलनोत्सवः

७.३.२०१२ दिनाङ्के राष्ट्रियसंस्कृतसंस्थाने इदम्प्रथमतया होलिकामङ्गलमिलनोत्सवः समायोज्यत। अस्मिन्नवसरे संस्थानस्य कुलपतिना आचार्यराधावल्लभत्रिपाठिना संस्थानस्य सर्वेभ्यः कर्मचारिभ्यः शिक्षकेभ्यश्च शुभकामनाः प्रादायि। अस्मिन्नवसरे वाराणसीस्थ-सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्राक्तनकुलपतिना आचार्येण 'अभिराज'राजेन्द्रमिश्रेण वर्धापन-पुरस्सरं स्वरचितं फाल्गुन-मादक-गन्ध-भरितं गीतमपि श्रावितम्। संस्थाने शास्त्रचूडामणिविद्वत्पदं भूषयता डा. रमाकान्तशुक्लेन संस्कृत-व्रजभाषयोः वसन्तोत्सव-होली-क्रीडन-परकाणि पद्यानि अश्रावयत। संस्थानस्य कुलसचिवेन डा. के.बी. सुब्बरायडुमहाभागेन स्वागत-भाषणं कृत्वा उपर्युक्तानां त्रयाणामपि विदुषां पुष्पगुच्छेन स्वागतमकारि। अस्मिन्नवसरे संस्थानस्य कुलपतिना पञ्चदशविश्वसंस्कृतसम्मेलने साहाय्यं कृतवद्भ्यः विश्वसंस्कृत-सम्मेलन-चिह्नान्यपि उपायनीकृतानि। डा. शुक्लामुखर्जी स्मृतिचिह्नप्रदानोत्सवस्य सञ्चालनमकरोत्।



होलिकामङ्गलमिलनोत्सवे प्रवीणरायाय स्मृतिचिह्नं प्रयच्छन् आचार्यराधावल्लभत्रिपाठी

समारोहानन्तरं कुलपतिना अन्यैश्च समवेतैर्जनैः पिष्टवर्णचूर्णेन मस्तके तिलकं विधाय होलिकापर्वणि स्वमङ्गलकामनाः सर्वेभ्यः उपहृताः।

## नवदेहल्यां संस्कृतनाट्यमहोत्सवः



दीपं प्रज्वाल्य नाट्योत्सवस्योद्घाटनं कुर्वन्तः अतिथयः

नवदेहल्यां ३० जनवरी, २०१२ तः ०१ फरवरी, २०१२ पर्यन्तं लिटिल्-थियेटर-ग्रुप् (एल.टी.जी.) इति प्रेक्षागृहे राष्ट्रियसंस्कृतसंस्थानेन संस्कृतनाट्यमहोत्सवः समाचरितः। प्रतिवर्षम् आयोजनमिदं संस्थानेन क्रियते। संस्थानस्य दशपरिसराणां छात्राः छात्र्यश्च कुशीलवत्वेन नाट्यमहोत्सवरूपेऽस्मिन् अन्तःपरिसरीयस्पर्धाकार्यक्रमे भागं ग्रहीत्वा स्वीयकौशलं प्रदर्शयन्ति। अत्रेदं स्मारणीयमस्ति यत् प्रगतवर्षे कालिदासप्रणीतस्य अभिज्ञानशाकुन्तलस्य सम्पूर्णस्य गतवर्षे च भासरूपकाणां प्रस्तुतयः संस्थानच्छात्रैः मञ्चं नीताः। नवमेऽस्मिन् नाट्यमहोत्सवे रामकथाश्रितरूपकाणां शृङ्खला नाट्ये प्रयुक्ता। वसन्तोत्सवः कौमुदीमहोत्सवः चेति नाम्ना पूर्वं विख्यातोऽयम् उत्सवः साम्प्रतं नाट्यमहोत्सवः इत्याख्यां प्राप्तः।

नाट्यमहोत्सवस्यास्य उद्घाटनकार्यक्रमः ३०.०१.२०१२ दिनाङ्के पूर्वाह्णे जातः। कार्यक्रमेऽस्मिन् मुख्यातिथित्वेन न्यायमूर्तिः मुकुन्दकामशर्मा, विशिष्टातिथित्वेन श्रीपवनमेहता, सारस्वतातिथित्वेन चमूकृष्णशास्त्री अध्यक्षत्वेन च आचार्यराधावल्लभत्रिपाठी आसन्।

३०.०१.२०१२ दिनाङ्के पुरीपरिसरेण उत्तररामचरितम्, जयपुरपरिसरेण कुन्दमाला-नाटकं च अभिनीतम्। ३१.०१.२०१२ दिनाङ्के भोपालपरिसरेण प्रसन्नराघवं, जम्मूपरिसरेण बालरामायणं, मुम्बईपरिसरेण अभिषेकनाटकं शृङ्गेरीपरिसरेण सीताराघवं च मञ्चे नटितम्। ०१.०२.२०१२ दिनाङ्के गरलीपरिसरेण प्रतिमानाटकं, लखनऊपरिसरेण महावीरचरितं, गुरुवायूरपरिसरेण आश्चर्यचूडामणि-नाटकं प्रस्तुतम्। एतासु प्रस्तुतीसु गुरुवायूर्-शृङ्गेरीपरिसराभ्यां प्रस्तुते नाटके अत्यन्तं प्रभावोत्पादके आस्ताम्।

०१.०२.२०१२ दिनाङ्के अस्य नाट्यमहोत्सवस्य समापनसमारोहः पुरस्कारप्रदानोत्सवश्च सम्पन्नः। अत्र श्रीरमाकान्तगोस्वामी श्रमोद्योगविभागयोः मन्त्री (दिल्लीशासनम्) मुख्यातिथिरूपेण, श्रीतरुणविजयः विशिष्टातिथित्वेन च वेदिकां शोभितवन्तौ। कार्यक्रमस्य मुख्यातिथिः श्रीरमाकान्तगोस्वामी उक्तवान् यत् 'अनेन कार्यक्रमेण भारतस्य गौरवम् अवर्धत इति मया अनुभूतम्।' सः अस्य कार्यक्रमस्य सफलतायै आचार्याय राधावल्लभत्रिपाठिने साधुवादं प्रदाय परिसरीयान् प्रतिभागिछात्रान् अध्यापकांश्च प्रशंसितवान्। मुख्यातिथिः श्रीतरुणविजयः (सांसदः राज्यसभा) भारतस्य गौरवं प्रकटयन् प्रोक्तवान् यत् संस्कृतस्य छात्राः भारतीयसंसदि सर्वाधिकाः भविष्यन्तीति मे विश्वासः। तेन प्रोक्तं यत् भारतीयसंस्कृतेः आधारः संस्कृतम् अस्ति। अद्यापि यत्र कुत्रापि कस्यापि उद्योगारम्भे संस्कृतम् आवश्यकम् इति सर्वे जानन्ति पश्यन्ति च। नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्य-राधावल्लभत्रिपाठी प्रतिभागिनां छात्राणाम् उत्साहवर्धनं कुर्वन् तान् प्रेरितवान्। अन्ते प्रो. के.बी. सुब्बरायडुमहोदयेन कुलपतिपक्षतः विशिष्टविदुषां भूरिशः अभिनन्दनं सम्पादितम्। उक्तरूपकेषु विजेतृरूपकाणि इत्थं वर्तन्ते-

| | | |
|---|---|---|
| **प्रथमम्** | आश्चर्यचूडामणिः | गुरुवायूरपरिसरः |
| | सीताराघवम् | शृङ्गेरीपरिसरः |
| **द्वितीयम्** | कुन्दमाला | जयपुरपरिसरः |
| | उत्तररामचरितम् | पुरीपरिसरः |
| **तृतीयम्** | अभिषेकनाटकम् | मुम्बईपरिसरः |
| | प्रतिमानाटकम् | गरलीपरिसरः |
| **प्रोत्साहनम्** | महावीरचरितम् | लखनऊपरिसरः |



आश्चर्यचूडामणिनाटकम्



सीताराघवम्



उत्तररामचरितम्



कुन्दमाला



तत्र श्रेष्ठं निर्देशनं, सङ्गीतनिर्देशनं प्रकाशव्यवस्थापनम् आहार्यम् मञ्चव्यवस्थापनं चेति पुरस्कारान् विविधरूपकाणि आप्नुवन्। तानि इत्थं सन्ति–

| | | |
|---|---|---|
| श्रेष्ठं निर्देशनम् | उत्तररामचरितम् | पुरीपरिसरः |
| श्रेष्ठं सङ्गीतनिर्देशनम् | प्रसन्नराघवम् | भोपालपरिसरः |
| श्रेष्ठं प्रकाशव्यवस्थापनम् | सीताराघवम् | शृङ्गेरीपरिसरः |
| श्रेष्ठमाहार्यम् मञ्चव्यवस्थापनं च | कुन्दमाला | जयपुरपरिसरः |

सर्वोत्तमः अभिनेता सर्वोत्तमा अभिनेत्री च अधः निर्दिश्येते–

सर्वोत्तमः अभिनेता सुब्रत षडङ्गी (रामः) उत्तररामचरितम् (पुरी)

सर्वोत्तमा अभिनेत्री दीपा हेगडे (मन्थरा) सीताराघवम् (शृङ्गेरी)

रूपकशः तृतीय-द्वितीय-प्रथमपुरस्कारभाजः कुशीलवाः इमे सन्ति–

| | | | | |
|---|---|---|---|---|
| १. | उत्तरामचरितम्<br>श्रीसदाशिवपरिसरः, पुरी | कविता साहु<br>(सीता) | विभूतिभूषणमिश्रः<br>(लवः सूत्रधारश्च) | सुव्रतषड्ङ्गी<br>(रामः) |
| २. | कुन्दमाला<br>जयपुर-परिसरः, जयपुरम् | मैनाकुमारीशर्मा<br>(मयूरी नर्तकी च) | सङ्कल्पमिश्रः<br>(रामः) | अन्तिमबालाजैन<br>(सीता) |
| ३. | प्रसन्नराघवम्<br>भोपाल-परिसरः, भोपालम् | सुश्रीः दीपिका<br>(त्रिजटा) | केशवबाबूशर्मा<br>(रावणः) | पुनीतकुमारसंज्ञा<br>(परशुरामः) |
| ४. | बालरामायणम्<br>श्रीरणवीर-परिसरः, जम्मू | प्रमोदकुमारः<br>(परशुरामः) | अरविन्दशर्मा<br>(शूर्पणखा) | पुरुषोत्तमदासः<br>(रावणः) |
| ५. | अभिषेकनाटकम्<br>के.जे.सोमय्या सं. विद्यापीठम्, मुम्बई | केशवशर्मा<br>(रावणः) | मधुरपाठकः<br>(हनुमान्) वानरः | राजेन्द्र-उपाध्यायः<br>(बालिः) |
| ६. | सीताराघवम्<br>राजीवगान्धी-परिसरः,शृङ्गेरी | कलाधरभट्टः<br>(श्रीरामः) | दीपा हेगडे<br>(मन्थरा) | विजयः जी.भट्टः<br>(रावणः) |
| ७. | प्रतिमानाटकम्<br>श्रीवेदव्यासपरिसरः, गरली | तिलकराजः<br>(रावणः) | अभिषेकशर्मा<br>(भरतः) | अङ्कुशकुमारः<br>(दशरथः) |
| ८. | महावीरचरितम्<br>लखनउ-परिसरः, लखनउ | ज्योतिः<br>(लङ्का) | घनानन्दः<br>(सूत्रधारः) | लक्ष्मीकान्तपाठकः<br>(परशुरामः) |
| ९. | आश्चर्यचूडामणिः<br>गुरुवायूरु-परिसरः, पुरनाट्टुकरा | स्वाति पि.राज्<br>(शूर्पणखा) | गीताञ्जली वि.जी.<br>(सीता) | निबिन् पी.यू.<br>(लक्ष्मणः रावणः च) |



समापनसमारोहे भाषमाणः आचार्य के.बी.सुब्बरायुडुः



कार्यक्रमम् अवलोकयन्तः प्रेक्षकाः


## नाट्यशास्त्रमाहात्म्यम्

–मुकुन्दकामशर्मा

**संसारनाट्यनिर्माणे याऽवकाशविधानतः।**
**पूर्वरङ्गायते व्योम मूर्त्तिं तां शाङ्करीं नुमः॥**

महदिदं प्रमोदस्थानं यत् राष्ट्रियसंस्कृतसंस्थानेन अस्मिन् वर्षेऽपि प्रतिवर्षमिव 'कौमुदीमहोत्सवः' समनुष्ठीयते। विगतेभ्यः कतिपयवर्षेभ्यः आयोज्यमानोऽयं महोत्सवः न केवलं भारतदेशस्य विविधवेश-भाषाचार-संवलितान् संस्कृतच्छात्रान् एकस्मिन् रङ्गपीठे आनीय तेषु ऐक्यं प्रतिष्ठापयति अपितु प्राचीनां भारतीयां नाट्यपरम्परामपि पोषयति संस्कृतवाणीमपि संवर्धयति।

साहित्यशास्त्रीयपरम्परायां नाट्यशास्त्रस्य प्रमुखं स्थानं विद्यते। तच्च नाट्यशास्त्रं मुनिना भरतेन महाकविकालिदासादपि पूर्ववर्तिनि काले प्रणीतम्। तस्मिन् ग्रन्थे षड्त्रिंशद् अध्यायाः सन्ति। तमेव ग्रन्थमाश्रित्य परवर्तिनः नाट्याचार्याः स्व-स्वसिद्धान्तान् प्रतिपादितवन्तः प्रयोगं च कृतवन्तः, कुर्वन्त्यपि।



भाषमाणः न्यायमूर्तिः मुकुन्दकामशर्मा

नाट्यशास्त्रस्य प्रथमे अध्याये पञ्च प्रश्नाः सन्ति तेषां समाधानमेव सम्पूर्णे ग्रन्थे दृश्यते। यथा–

**योऽयं भगवता सम्यग्ग्रथितो वेदसम्मितः।**
**नाट्यवेदः कथं ब्रह्मन् उत्पन्नः, कस्य वा कृते॥**
**कत्यङ्गः, किंप्रमाणश्च, प्रयोगश्चास्य कीदृशः॥** ना.शा. १/३–४

तत्र सम्पूर्णे ग्रन्थे सविस्तरम् इमे सर्वेऽपि प्रश्नाः समाहिताः सन्ति। प्रथमाध्याये नाट्योत्पत्ति–विषयिणी कथा समागता। तदनुसारम् एकदा सर्वे देवाः ब्रह्मणः समक्षं गत्वा ऊचुः यत्–

**क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यत् भवेत्।** ना.शा. १/११

तेषां सर्वेषामभ्यर्थनां श्रुत्वा ब्रह्मा नाट्यवेदं रचितवान् तदर्थं तेन चतुर्भ्यः वेदेभ्यः प्रमुखानि तत्त्वानि गृहीतानि। तद्यथा–

**जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतिमेव च।**
**यजुर्वेदादभिनयान् रसानाथर्वणादपि॥** ना.शा. १/१७

अनेन सिद्ध्यति यत् नाट्ये एकतः क्रीडनीयकता भवति अपरतश्च वेदसम्मतता। अर्थात् उभयोः समन्वयेन नाट्यं साधु प्रवर्तते। एकस्य आधिक्यम् अपरस्य न्यूनत्वं नाट्ये विकृतिं जनयति। नाट्योत्पत्तौ यत्प्रयोजनमासीत् देवानां तदासीत् वस्तुतो जम्बूद्वीपवासिनां सानुरागं ज्ञाने सदाचरणे च प्रवृत्तिरिति। नाट्यस्य प्रयोजनं प्रतिपादयता मुनिना भरतेन सविशदं प्रोक्तम्–

**दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।**
**विश्रान्तिजननं काले नाट्यमेतद् भविष्यति॥** ना.शा. १/११५
**वेदविद्येतिहासानामाख्यानपरिकल्पनम्।**
**विनोदकरणं लोके नाट्यमेतद्भविष्यति॥**
**श्रुतिस्मृतिसदाचार-परिशेषार्थकल्पनम्।**
**विनोदजननं लोके नाट्यमेतद्भविष्यति॥** ना.शा. १/१२३–१२३

अयं नाट्यवेदः सार्ववर्णिकः अर्थात् सर्वेषां कृते ब्रह्मणा निर्मितः। फलतः अयं सर्वेषां कृते समुपदेशात्मको विनोदजनकश्च अभवत्। नाट्यं दृष्ट्वा सर्वेऽपि आनन्दमनुभवन्ति। अतः नाट्यम् अतीव व्यापकं भवति, सुखदुःखात्मकस्य लोकस्य स्वभावाभिनयः अत्र भवति। नाट्यकारः कविः, समाजस्य यां कामपि दशां वर्णयति तस्याः दशायाः अभिनयैः प्रस्तुतीकरणमेव नाट्यं भवति। तदुक्तं मुनिना भरतेन नाट्यशास्त्रे–

**त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्।** ना.शा. १/१०७
**यो यः स्वभावो लोकस्य सुखदुःखसमन्वितः।**
**सोऽङ्गाद्यभिनयोपेतो नाट्यमित्यभिधीयते॥** ना.शा. १/१२१

नाट्यं त्रैलोक्यस्य भावानुकीर्तनमस्ति। अतः त्रैलोक्ये यत्किमपि वर्तते तत् सर्वं नाट्यस्य वस्तु भवितुमर्हति। एतत् तत्त्वं मुनिना स्वयमेव प्रोक्तम्–

**न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।**
**नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते॥**
**सर्वशास्त्राणि शिल्पानि कर्माणि विविधानि च।**
**अस्मिन्नाट्ये समेतानि तस्मादेतन्मया कृतम्॥** ना.शा. १/११७,११८

संस्कृतवाङ्मये नाट्यसाहित्यमतीव समृद्धमस्ति। यतो हि नाट्यं साक्षाल्लोकसम्बद्धं भवति। अत्र तु न केवलं लोकवृत्तानुकरणं विद्यते अपितु समग्रं लौकिकं वातावरणं वृत्ति–प्रवृत्तिभ्यां निर्मीयते। वृत्तीनां नाट्ये अतीव महत्त्वं भवति। अस्मादेव कारणाद् **'वृत्तयो नाट्यमातरः'** इति मुनिना प्रोक्तमस्ति। किन्तु प्रवृत्तयो हि देशवेषभाषाचारादीनां ख्यापनार्थं प्रयुक्ताः भवन्ति। लोकधर्मिनाट्यस्य प्रयोगे प्रवृत्तीनामेव महती भूमिका भवति। नाट्यं लोकानुरञ्जकं भवेत् लोकोपदेशात्मकं भवेदिति धिया मुनिना तत्र भाषाविधाने लोकभाषायाः प्रयोगार्थं निर्देशः कृतः। अस्मादेव कारणात् प्राचीनेषु संस्कृतनाट्येषु प्राकृतभाषायाः बहुलः प्रयोगः परिलक्ष्यते। न केवलमेतावद् अपितु मुनिना भरतेन स्पष्टं निर्दिष्टं यत् यत्र कुत्रापि संशयो भवति तत्र लोकादेव निर्णयः कर्त्तव्यः। तेन त्रिविधं प्रमाणं स्वीकृतम्–

**लोको वेदस्तथाऽध्यात्मं प्रमाणं त्रिविधं स्मृतम्॥**

प्राचीनकालादेव लोके नाट्यस्य महान् प्रयोगो दृश्यते। केरले देशे कुडियाट्टमशैलीमाश्रित्य, आन्ध्रप्रदेशे हरिकथाशैलीमाश्रित्य, कर्णाटकदेशे यक्षगानमाश्रित्य, असमप्रदेशे अङ्कियाशैलीमाश्रित्य, तमिलनाडुप्रदेशे भरतनाट्यमाश्रित्य प्राचीनकालाद् इदानीमपि संस्कृतनाट्यपरम्परा प्रवर्तते। एवंविधैः नाट्यप्रयोगैः दार्शनिकाः समाजसुधारकाः भक्ताः भगवतः चरितं लोकानां समक्षं प्रस्तुतवन्तः, इदानीमपि प्रस्तुवन्ति, तेषां प्रयोगाणाञ्च प्रबलः प्रभावः समाजे दृश्यते।

संक्षेपतः उच्यते यत् नाट्यस्य सर्वेऽपि प्रशंसां कुर्वन्ति। महाकविना कालिदासेन नाट्यस्य प्रशंसायां मालविकाग्निमित्रनाटके नाट्याचार्यस्य

**कामं खलु सर्वस्यापि कुलविद्या बहुमता।**
**न पुनरस्माकं नाट्यं प्रति मिथ्या गौरवम्।**

तथाहि–

**नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्॥** मा. १/४

अतः भिन्नरुचीनां जनानामपि प्रसादनार्थं सर्वोपयुक्तं साधनं नाट्यमेवास्ति।

राष्ट्रियसंस्कृतसंस्थानस्य कुलपतयः प्रो. राधावल्लभत्रिपाठिनस्तु नाट्यशास्त्रे कृतभूरिपरिश्रमाः सन्ति। एभिः सुसम्पादितो नाट्यशास्त्रीयबृहत्कोषः न केवलम् एतेषां नाट्यशास्त्रविषयकं पाण्डित्यं प्रमाणयति अपितु अस्मिन् क्षेत्रे कार्यं कुर्वतामपि विदुषां कृते सुतरां सहायको भवति। अतः नाट्यविद्या तु एतेषां कुलविद्यैव प्रतिभाति। राष्ट्रिय–संस्कृत–संस्थानस्य चतुरस्रविकासे एतेषां योगदानं सर्वथा प्रशंसनीयमस्ति। नातिपूर्वं विश्वसंस्कृतसम्मेलनस्य सुसफलं समायोजनम् एतेषां नैपुण्यं द्योतयति। अतोऽहं त्रिपाठिमहोदयेभ्यः साधुवादान् वितनोमि।

अस्मिन् त्रिदिवसीये कौमुदीमहोत्सवे दशपरिसरेभ्यः दश नाट्यानां प्रयोगाः सुनिश्चिताः सन्ति। नाट्यानां प्रयोगार्थं तत्तत्परिसरेभ्यः समागताः आचार्याः, छात्राः, छात्र्यः धन्यवादविशेषस्य पात्राणि सन्ति। अन्ते पुनः भरतेन मुनिना या काचित् नाट्यप्रयोगफलश्रुतिः प्रोक्ता तामेव श्रावयित्वा अहम् अत्रैव विरमामि।

**य इमं शृणुयात् प्रोक्तं नाट्यवेदं स्वयम्भुवा।**
**कुर्यात्प्रयोगं यश्चैनं तथाऽधीयीत वा नरः॥**

**या गतिर्वेदविदुषां या गतिर्यज्ञवेदिनाम्।**
**या गतिर्दानशीलानां तां गतिं प्राप्नुयात्तु सः॥**

ना.शा. ३६/२७–२८

नवीनाः उपक्रमाः

## अन्ताराष्ट्रियग्रन्थमालायाः प्रकाशनम्

राष्ट्रियसंस्कृतसंस्थानेन स्वर्णजयन्ती–रजतजयन्ती–अप्रकाशितपाण्डुलिपिप्रकाशन–लोकप्रियसाहित्यग्रन्थमाला–पालि/प्राकृत–अध्ययनग्रन्थमालाप्रभृति–प्रकाशनग्रन्थमालाः प्रचलन्त्येव। साम्प्रतं संस्थानेन अन्ताराष्ट्रियग्रन्थमाला अपि समारब्धा, यस्याम् अन्ताराष्ट्रियस्तरे ख्यातानां विदुषां ग्रन्थाः प्रकाशयिष्यन्ते।

## विद्युद्दूतः संस्थानस्य अन्तर्जालपुटे विनिवेशितः

राष्ट्रियसंस्कृतसंस्थानस्य जालपुटे अन्ताराष्ट्रिय-संस्कृताध्ययनसमवायस्य केचन अंशा निवेशिता सन्ति, तेषु विद्युद्दूतः इति अन्तर्जालपुटस्य पत्रम् (वेबपेज) अपि निवेशितो जातः। अधुना विद्युद्दूतस्य प्रथमाङ्कः सर्वैरपि अवलोकयितुं शक्यते।

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा ०९.०४.२०१२ तः २६.०४.२०१२ पर्यन्तं निरीक्षणं विधास्यति। अत्र समितिसदस्या इत्थं वर्तन्ते–

| | |
|---|---|
| आचार्यपङ्कजचान्दे, | – अध्यक्षः |
| आचार्यः के.के. शर्मा | – सदस्यः |
| आचार्याः अरुणा गोयल | – सदस्याः |
| आचार्यः के.वी. रामकृष्णमाचार्युलुः | – सदस्यः |
| आचार्यः सीनिरुद्ध दासः | – सदस्यः |
| आचार्यः सी.एस. राधाकृष्णन् | – सदस्यः |
| आचार्यः अशोककालिया | – सदस्यः |
| डा. सुधारानी पाण्डेय | – सदस्यः |
| आचार्यः मानबेन्दु बैनर्जी | – सदस्यः |

## जाह्नवी-ई-पत्रिकायाः लोकार्पणम्

कोलकातायां नरेन्द्रपुरस्थस्य रामकृष्ण–मिशन–आवासीय–स्वयंशासितमहाविद्यालयस्य संस्कृतविभागेन फरबरीमासस्य २–३ दिनाङ्कयोः संस्कृते अनूदितं रवीन्द्रसाहित्यम् इति विषयमधिकृत्य दिनद्वयात्मिका राष्ट्रिया सङ्गोष्ठी आयोजिता। तदङ्गतया प्रो. सीतानाथ आचार्यस्य आध्यक्ष्ये, प्रो. राधावल्लभत्रिपाठिनां, प्रो. रमाकान्तशुक्लानाम् आतिथ्ये, श्रीराकेशदाशस्य संयोजनायां प्रचलिते कविसमवाये पञ्चदश कवयः स्वकाव्यानि पठितवन्तः। अस्मिन् सत्रे जाह्नवी–ई–जर्नलइत्यस्याः आन्तर्जालपत्रिकायाः लोकार्पणं विहितं राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिभिः आचार्यैः राधावल्लभत्रिपाठिभिः। पत्रिकां समुपस्थापितवान् डॉ. मुकेशकुमारझा–महोदयः। पत्रिकाविषये विवरणं दत्तवान् – कथासरितः सहसम्पादकः श्रीराकेशकुमारदाशः। कार्यक्रमं संयोजितवान् नारायणदाशः। कार्यक्रमे उपस्थिताः आसन् – प्रो. सीतानाथ आचार्यः, प्रो. नवनारायणवन्द्योपाध्यायः, डॉ. बनमालिबिश्वालः, डॉ. तन्मयकुमारभट्टाचार्यः, डॉ. सूर्यमणिरथः, अजयकुमारमिश्रः, धर्मेन्द्रकुमारसिंहदेवः, अशोककुमारव्यासः, राकेशदाशः, विश्वनाथस्वाईं, विवेकानन्दपाणिग्राही, चन्द्रशेखरदासवर्मा, सौमित्रः अधिकारी, खोखनभट्टाचार्यः, सम्पापाल, इत्यादयः शतं प्रायाः विद्वांसः। नरेन्द्रपुरस्थ–रामकृष्णमिशनस्य अध्यापकानाम्, श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयस्य अध्यापकानामत्र विशेषः सहयोग आसीत् इति ते धन्यवादार्हाः सन्ति।

## संस्कृते अनूदितं रवीन्द्रसाहित्यमधिकृत्य राष्ट्रियसङ्गोष्ठी



स्वागतभाषणं कुर्वन् स्वामिसुपर्णानन्दमहाराजः

कोलकातायां नरेन्द्रपुरस्थस्य रामकृष्ण-मिशन-आवासीय-स्वयंशासितमहाविद्यालयस्य संस्कृतविभागेन फरवरीमासस्य २-३ दिनाङ्कयोः संस्कृते अनूदितं रवीन्द्रसाहित्यम् इति विषयमधिकृत्य विश्वविद्यालयानुदानायोगस्यार्थिकसहयोगेन प्रायोजिता दिनद्वयात्मिका राष्ट्रिया सङ्गोष्ठी खड्गपुरमहाविद्यालयस्य संस्कृतविभागस्य सहयोगेन सुसम्पन्ना जाता। महाविद्यालयस्य सभागारे आयोजितस्यास्य सम्मेलनस्य मुख्यातिथिः आचार्यः राधावल्लभत्रिपाठी वेदघोषसहितं प्रदीपप्रज्ज्वलनपूर्वकं सङ्गोष्ठ्याः उद्घाटनं कृत्वा अवोचत् यत्- संस्कृतसाहित्यस्य लौकिकसाहित्यस्य च अन्तः प्रविश्य स्वकालानुरोधेन परिवर्त्य समाजानुरोधेन संस्कृत्य नूतनसाहित्यमसृजत् ऋषिरयं रवीन्द्रनाथः। सः यथा संस्कृतस्य औपनिषदीयचिन्ताधारायाः महाभारतीयचिन्ताधारायाश्च प्रचारं कृत्वा लौकिकेषु प्रापितवान्, नवजागरणं च आनीतवान्, तथैव संस्कृतज्ञानां कर्तव्यं वर्तते शताधिकवर्षाणां व्यवधानेन रवीन्द्रसाहित्यं संस्कृत्य सुखपाठ्य-मूलानुगसंस्कृतभाषया अनूद्य संस्कृसाहित्यस्य समृद्धिकरणं, दक्षिणभारतादिक्षेत्रे प्रापणञ्चेति। तेन सामाजिकस्तरे पुनः जागरणं भविष्यति, तस्य सत्साहित्येन समाजः प्रचोदितः सन् अग्रेसृतो भविष्यति। कार्यक्रमस्य प्रारम्भे डा. अरूपकुमारविश्वासः रवीन्द्रसङ्गीतं गीतवान्। अतिथीन् माल्यार्पणेन राङ्कवादिप्रदानेन सत्कृत्य महाविद्यालयस्य अध्यक्षस्तथा नरेन्द्रपुरस्थस्य रामकृष्णामिशनस्य सम्पादकः स्वामी सुपर्णानन्दमहाराजः स्वागतभाषणे अभाषत् यत् रवीन्द्रनाथस्य कालातीताः सर्वदा सर्वत्र सहृदयानां हृदयं रञ्जयन्ति। अवङ्गीयाः संस्कृतज्ञाः अपि तदर्थं तन्मन्त्रमुग्धाः सन्तः तस्य अनुवादमाध्यमेन नवसर्जनमेव कृतवन्तः इत्यत्र नास्ति सन्देहस्य लेशोऽपि। अतः सङ्गोष्ठ्यामस्यां भवतु नाम, अनुवादस्य वातायनेन रवीन्द्रसाहित्यस्य पर्यालोचनेन तत्साहित्यस्मरणपुण्यफलं वयं प्राप्स्याम एव। सङ्गोष्ठ्याः संयोजकः संस्कृतविभागाध्यक्षः च डॉ. नारायणदाशः सङ्गोष्ठ्याः विवरणप्रदानावसरे अवदत् – जानीमो वयं यद्गीताञ्जलिरिति काव्यसङ्ग्रहः १९१३ कैस्ताब्दे नोबेलप्रशस्त्या सभाजितः। तत्र तस्य अनुवाद एव कारणमासीत्। अनुवादोऽपि एका कलैव, यां परिचिनोति सहृदय एव। यदर्थं विश्वकवेरनुवादं न्यक्कृत्य परिष्कारः कृतः कविना इयेटवर्येण समकालिकेन उइलियमराडिकेवर्येण। विविधासु भाषासु तस्य कथा-कविता-नाटकादीनामनुवादो जातः। केवलं संस्कृतभाषया गीताञ्जलेः पञ्चदश अनुवादाः जाताः। तदा तदा रवीन्द्ररूपकाणां कथानामपि संस्कृतानुवादो जात एव। तस्य सामग्रिकतया समीक्षात्मकमध्ययनं वास्याः सङ्गोष्ठ्याः मूलमुद्देश्यं वर्तते। कोलकाताविश्वविद्यालयस्य गोपीनाथकविराजपदासीनः आचार्यचरः सीतानाथ आचार्यशास्त्री उद्घाटने आध्यक्षतां कृत्वा अवदत् यत् रवीन्द्रस्य काव्यपरम्परा यथा अनन्ता तथैव विचित्रा तस्य अनुवादपरम्परा। विशेषतः तत्र वङ्गीयानां योगदानमुल्लेखनीयमेव। तत्र पुनः एषा सङ्गोष्ठी अनन्या अभूतपूर्वा च वर्तते। अतिथिभ्यः धन्यवादान् दत्तवान् श्रीअचिन्त्यम् चटर्जीः। सङ्गोष्ठ्याः अङ्गतया शोधपत्रवाचनं जातं पञ्चशैक्षणिकसत्रेषु २५ शोधपत्राणि वाचितानि प्रो. नवनारायणवन्द्योपाध्याय-प्रो. रमाकान्तशुक्ल-डॉ. बनमालिबिश्वाल-डॉ. सूर्यमणिरथ-डॉ. विश्वनाथस्वाइँ-महोदयानामाध्यक्ष्ये, डॉ. तन्मयकुमारभट्टाचार्य-डॉ. अरुणरञ्जनमिश्र-डॉ. धर्मेन्द्रकुमारसिंहदेव-डॉ. अशोकव्यासादीनां संयोजनायाम्। तदङ्गतया प्रो. सीतानाथ-आचार्यस्य आध्यक्ष्ये, प्रो. राधावल्लभत्रिपाठिनः, प्रो. रमाकान्तशुक्लस्य च आतिथ्ये, श्रीराकेशदाशस्य संयोजनाने प्रचलिते कविसमवाये पञ्चदश कवयः स्वकाव्यानि पठितवन्तः। अस्मिन् सत्रे जाह्नवी-ई-जर्नल इत्यस्याः आन्तर्जालपत्रिकायाः लोकार्पणं विहितं, राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिना आचार्येण राधावल्लभत्रिपाठिना। एवञ्च रवीन्द्रनाथकृत-डाकघर इति नाटकस्य 'पत्रालयः' बनमालिबिश्वालकृतस्य अनुवादस्य, डॉ. विवेकानन्दपाणिग्राहिणः वेदुइनगीतम् इति नारायणदाशकृतसंस्कृतानुवादस्य, श्रीचन्द्रशेखरदासवर्मणः कथानां सप्ताहेर सात दिन इति नारायणदाशकृतवङ्गानुवादस्य, नारदस्य व्यथा इति अनूदितकथासङ्ग्रहस्य, सुकान्तकथाविंशतिः इति डॉ. सुकान्तकुमारसेनापतेः कथासङ्ग्रहस्य, कथासरितः विश्वकथाविशेषाङ्कस्य च लोकार्पणमभवत् अत्रैव।

सङ्गोष्ठ्याः समापनसत्रं महाविद्यालयस्य उपाध्यक्षस्य स्वामिनो भूदेवानन्दमहाराजस्य आध्यक्ष्ये, आचार्यरमाकान्तशुक्लस्य मुख्यातिथित्वे, स्वामिनः पुरातनानन्दमहाराजस्य विशिष्टातिथित्वे सम्पन्नम्। सङ्गोष्ठ्याः अनुभवान् प्राकाशयन् अरुणरञ्जनमिश्र-अजयकुमारमिश्र-सूर्यमणिरथ-सौमित्राधिकारिणः। मुख्यातिथिः प्रो. शुक्लः विस्तरशः सङ्गोष्ठ्याः उपलब्धीः आलोचितवान्। स्वामी पुरातनानन्दः विश्ववक्षसि रवीन्द्रसाहित्यस्य प्रचारं प्रसारं श्लाघितवान्। सभाध्यक्षः स्वामी भूदेवानन्दः अनुवादः समृद्धसंस्कृतस्य भिन्नामेव दिशम् उन्मीलयिष्यति जनं जनं प्रापयिष्यति इति प्रत्यपादयत्। संयोजकः नारायणदाशः अतिथिभ्यः धन्यवादान् वितीर्णवान्, विशेषतः विश्वविद्यालयानुदानायोगस्य, राष्ट्रियसंस्कृतसंस्थानस्य, नरेन्द्रपुरस्थ-रामकृष्णमिशनस्य च नामस्मरणपूर्वकं धन्यावादान् अर्पितवान्। अतिथयः प्रतिभागिभ्यः प्रमाणपत्राणि वितीर्णवन्तः। अन्तिमपर्याये अरुणरञ्जनमिश्ररमाकान्तशुक्लयोः काव्यगानेन सङ्गोष्ठीयमवसिता।

## कुलपतेः दैनन्दिनी

| | |
|---|---|
| ०४.०१.२०१२ | राष्ट्रियसंस्कृतसंस्थानेन समायोजिते पूर्वरङ्ग-कार्यक्रमे समुपस्थितिः। |
| ०५.०१.२०१२ | नवदेहलीस्थ-विज्ञानभवने पञ्चदश-विश्वसंस्कृतसम्मेलनस्य उद्घाटनसमारोहे उपस्थितिः। |
| १०.०१.२०१२ | नवदेहलीस्थ-विज्ञानभवने पञ्चदशस्य विश्वसंस्कृतसम्मेलनस्य समापनसमारोहे उपस्थितिः। |
| ११.०१.२०१२ | अन्ताराष्ट्रियप्रकाशनशृङ्खलायाः आरम्भाय परामर्शदातृमण्डलस्य उपवेशने अध्यक्षता। |
| १५.०१.२०१२ | कर्णाटकस्थ- शृङ्गेरीपरिसरे 'वैश्विकचिन्तने संस्कृतस्यावदानम्' इति विषये अन्ताराष्ट्रियसङ्गोष्ठ्यां भागग्रहणम् आधारभाषणोपस्थानं च। |
| २१.०१.२०१२ | असमस्य शिलचरनगर्यां राष्ट्रियसंस्कृतसंस्थानेन समायोजिते अनौपचारिकसंस्कृतशिक्षणकेन्द्रस्योद्घाटन- कार्यक्रमे मुख्यातिथ्यम्। |
| २५.०१.२०१२ | मुम्बय्यां 'सन्त-वाणी ५' इति ग्रन्थस्य लोकार्पणं वक्तव्यं च। मुम्बईपरिसरस्य भवननिर्माणविषये श्रीसमीरसोमैयामहोदयेन सह उपवेशनम्। |
| २६.०१.२०१२ | मुम्बईपरिसरस्य भवननिर्माणविषये श्रीसोमैयामहोदयेन सह परामर्शः। |
| ३०.०१.२०१२ - ०१.०२.२०१२ | नवदेहल्यां राष्ट्रियसंस्कृतसंस्थानेन समायोजिते नाट्यमहोत्सवे उपस्थितिः। |
| ०२.०२.२०१२ | कोलकातास्थ-रामकृष्णमिशन्-अवासीयमहाविद्यालयेन समायोजितायां सङ्गोष्ठ्यां मुख्यातिथ्यम्। कोलकातायां गौरीनाथशास्त्रिस्मृतिव्याख्यानमाला-कार्यक्रमे आध्यक्ष्यम्। |
| ०६.०२.२०१२ | नवदेहल्याम् इन्दिरागान्धीराष्ट्रियकलाकेन्द्रे राष्ट्रियपाण्डुलिपिमिशनद्वारा आयोजिते प्रकाशन-परामर्शदातृसमितेः उपवेशने समुपस्थितिः। |
| ०७-०८.०२.२०१२ | भाषिकसंयुक्तसचिवस्य आध्यक्ष्ये समायोजिते राष्ट्रियसंस्कृतसंस्थानस्य अनुदानसमित्युपवेशने समुपस्थितिः। |
| ०९.०२.२०१२ | नवदेहलीस्थ-टैगौरगार्डनस्थ-विद्यालयप्रबन्धसमितेः उपवेशने आध्यक्ष्यम्। |
| १०.०२.२०१२ | राष्ट्रियसंस्कृतसंस्थानस्य प्रकाशनसमित्युपवेशने आध्यक्ष्यम्। |
| १३.०२.२०१२ | नवदेहलीस्थ-श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठेन समायोजिते 'संस्कृतनाटकेषु प्राकृतम्' इति विषयाधारितायां सङ्गोष्ठ्यां व्याख्यानम्। |
| १८.०२.२०१२ | बेङ्गलुरुनगरे कर्णाटकसंस्कृतविश्वविद्यालय-अभिनवभारती इत्यनयोः संयुक्ततत्त्वावधाने आयोजितायां नाट्यशास्त्रमहिम-सम्बद्धायां सङ्गोष्ठ्याम् आधारभाषणम्। |
| २०.०२.२०१२ | नवदेहल्यां जनकपुरीस्थ-सूचनाप्रौद्योगिकी एवं प्रबन्धनसंस्थानेन समायोजिते महाशिवरात्रिमहोत्सवे मुख्यातिथित्वम्। |
| २२.०२.२०१२ | विश्वविद्यालयानुदानायोगस्य विशेषज्ञसमित्युपवेशने उपस्थितिः। |
| २३.०२.२०१२ | देहलीस्थ-हिन्दूमहाविद्यालये आयोजिते राष्ट्रियसम्मेलने सारस्वतातिथित्वम्। नवदेहलीस्थ- दीनदयालोपाध्यायमहाविद्यालये 'संस्कृतशिक्षणमूल्यानि इति विषये व्याख्यानम्'। |
| २७.०२०२०१२ | राष्ट्रियपाण्डुलिपिमिशनस्य तत्त्वबोधव्याख्यानमालान्तर्गततया व्याख्यानम्। |
| ०३.०३.२०१२ | नवदेहलीस्थश्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे समापनसमारोहे समुपस्थितिः। |
| ०४.०३.२०१२ | नवदेहलीस्थ-राजेन्द्रभवने जामिते-इस्लामी-द्वारा आयोजिते 'धर्मेषु मोक्षस्यावधारणा' इति विषयके परिसंवादे व्याख्यानम्। नवदेहलीस्थ-इन्दिरागान्धीराष्ट्रियमुक्तविश्वविद्यालये 'आइडियोलाजी एण्ड पोलिटिक्स ऑन ट्रांसलेशन' विषयके अन्ताराष्ट्रियसम्मेलने समापनभाषणम्। |
| ०६.०३.२०१२ | राष्ट्रियसंस्कृतसंस्थानस्य शोधमण्डलस्योपवेशने आध्यक्ष्यम्। |
| ०९.०३.२०१२ | भोपालपरिसरे राष्ट्रियनाट्यमहोत्सवस्योद्घाटनकार्यक्रमे आध्यक्ष्यम्। |
| १२.०३.२०१२ | षोडश-विश्वसंस्कृतसम्मेलनस्य विशेषज्ञसमित्युपवेशने सङ्कल्पविचारप्रेषणम्। |
| १४.०३.२०१२ | हरिद्वारे वाइडर एसोसिएशन आफ वैदिक स्टडीज इत्यनया देवसंस्कृतिविश्वविद्यालयस्य सहयोगेन समायोजिते सम्मेलने आधारभाषणम्। |
| १५.०३.२०१२ | राष्ट्रियसंस्कृतसंस्थाने अर्चनाजोशी-अनूदितस्य कथाञ्जलि-ग्रन्थस्य लोकार्पण-कार्यक्रमे आध्यक्ष्यम्। |
| १५.०३.२०१२ | श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य विशेषानुदानकार्यक्रमस्य परामर्शदातृमण्डलस्य उपवेशने आध्यक्ष्यम्। |
| १६.०३.२०१२ | श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे सङ्गोष्ठीसमापनावसरे विशिष्टव्याख्यानम्। |
| २१.०३.२०१२ | राष्ट्रियसंस्कृतसंस्थाने पुस्तकालयसमित्युपवेशने आध्यक्ष्यम्। |
| ३१.०३.२०१२ | हिमाचलप्रदेशस्य वेदव्यासपरिसरे (गरल्यां) राष्ट्रियसङ्गोष्ठ्याः उद्घाटनसत्रे आध्यक्ष्यम्। |

## संस्थानविदुषां गतिविधयः / कार्यकलापाः

**डा. रमाकान्तपाण्डेयः** – पूना विश्वविद्यालयस्य संस्कृतप्रगताध्ययन केन्द्रे १३.२.२०१२ दिनाङ्के शास्त्रग्रन्थानां भाषानुवादप्रविधिः तथा च १६.०३.२०१२ दिनाङ्के वेदाङ्गशास्त्रस्य सार्वकालिकता इति विषये व्याख्यानं समभवत्। विश्वसंस्कृतसम्मेलने 'A brief Sketch of Kacchavaṃśa' इत्यस्मिन् विषये शोधपत्रं प्रास्तौत्।

**डा. जनार्दनप्रसादपाण्डेयः** – इलाहाबादस्थ–गङ्गानाथझा–परिसरे सहाचार्यः अयं नवदिल्ल्याः विज्ञानभवने ०९.०१.२०१२ दिनाङ्के आयोजिते पञ्चदश विश्वसंस्कृतसम्मेलनावसरे आयोजिते विश्वसंस्कृतकविसम्मेलने स्वकवितां प्रस्तुतवान्। गणतन्त्रदिवसोपलक्ष्ये २१.०१.२०१२ तमे दिनाङ्के दिल्लीसंस्कृताकादम्या आयोजिते संस्कृतकविसम्मेलने स्वकवितां प्रस्तुतवान्। गणतन्त्रदिवसमभिलक्ष्य २३.१.२०१२ दिनाङ्के उत्तराखण्डसंस्कृतसंस्थानेनायोजिते हल्द्वानीनगरीये संस्कृतकविसम्मेलने स्वगीतं प्रस्तुतवान्।

**श्यामसुन्दरपाण्डेयः** – इलाहाबादस्थ–गङ्गानाथझा–परिसरे सहायकः पुस्तकालयाध्यक्षोऽयं २२.०३.२०१२ तः २३.३.२०१२ दिनाङ्कं यावत् इन्फर्मेशन लाइब्रेरी नेटवर्क इत्यस्य सहयोगेन नवदेहल्यां जवाहरलालनेहरूविश्वविद्यालये मैनेजिंग इलेक्ट्रानिक्स थीसिस एण्ड डिसर्टेसन्स इति विषयम् अधिकृत्य आयोजितायां राष्ट्रीयसंगोष्ठ्यां भागं गृहीतवान्।

**डा. रजनीशशुक्लः** – संस्थानमुख्यालये वरिष्ठशोधाध्येता (प्राकृतपरियोजना) अयं ५–१० जनवरी, २०१२ कालावधौ समायोजिते पञ्चदश–विश्वसंस्कृतसम्मेलने जैनाध्ययनप्रभागे 'महावीर की अहिंसा और विश्वशान्ति'–विषये, २३–२४ फर., २०१२ कालावधौ श्री लालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठे राष्ट्रियसङ्गोष्ठ्यां 'मुद्राराक्षस में प्रयुक्त प्राकृतों का सार्थक्य'–विषये तत्रैव २४–२६ मार्च, २०१२ कालावधौ आयोजितराष्ट्रियसङ्गोष्ठ्यां 'ध्यान और समाधिः बौद्ध साहित्य के सन्दर्भ में' विषये शोधपत्राणां वाचनम् अकरोत्।

**डा. ओ. आर्. विजयराघवन्** – गुरुवायूर्परिसरस्य न्यायविभागे सहायकाचार्यः अयं श्रीशङ्करविद्यापीठेन पेरुम्बावूर्नगरस्थितेन १९.०१.२०१२ तमे दिनाङ्के सञ्चालितयां राष्ट्रियसङ्गोष्ठ्यां "द्राविडसाहित्ये संस्कृतस्य प्रभावः" इति विषये शोधपत्रम् समार्पयत्।

**डा. का. इ. मधुसूदनः** – गुरुवायूर्परिसरस्य न्यायविभागाध्यक्षः १८.०२.२०१२ तमे दिनाङ्के पेरुम्बावूर्नगरे श्रीशङ्करविद्यापीठे समायोजिते राष्ट्रियविद्वत्समारोहे "शास्त्रेषु शिक्षणपद्धतिः" इति विषये कुञ्चिकाभाषणं विधाय सत्रस्य आध्यक्ष्यं निरवहत्।

**डा. पि. टि. सुरेशकुमारः** – अद्वैतवेदान्ताध्यापकः तिरुवनन्तपुरस्थकेरलविश्वविद्यालयीयकलाशालायां १७, १८ जन., २०१२ तमदिनाङ्कयोः प्रवृत्ते अन्ताराष्ट्रियसमारोहे "संस्कृतवाङ्मयपरम्परा–भाषाविज्ञाने अभिनवरीतयश्च" इति विषयमधिकृत्य पत्रम् प्रास्तौत्।

**डा. पि. इन्दिरा** – ०५–१० जन., २०१२ मिते काले नवदेहल्यां संवृत्ते विश्वसंस्कृतसम्मेलने "अणुग्रहमीमांसापरिचयः" इति शीर्षकाङ्कितं विचारमुपास्थापयत् सत्रसञ्चालनं च अकार्षीत्। तिरुवनन्तपुरस्थ–केरलविश्वविद्यालयीयकलाशालायां जनवरी १७, १८ तमदिनाङ्कयोः "संस्कृतवाङ्मयपरम्परा – भाषाविज्ञाने अभिनवरीतयश्च" इति विषयमधिकृत्य प्रवृत्ते अन्ताराष्ट्रियसमारोहे संस्कृतसाहित्ये "पदानां भाषाविज्ञानदृष्ट्या उपयोगः" इति विषये शोधपत्रं प्रस्तुतवती।

**डा. एस्. सुब्रह्मण्यशर्मा** – गुरुवायूर्परिसरस्य अद्वैतवेदान्तविभागे सहाचार्यः ऐषमः जनवरीमासे नवदेहल्यामायोजिते पञ्चदशे विश्वसंस्कृतसम्मेलने संस्कृतनाट्योत्सवस्य संयोजकः आसीत्। तस्मिन्नेव सम्मेलने "संस्कृतं विज्ञानञ्च" इति सत्रे "शक्तीनां प्रभवः" इति शीर्षके शोधपत्रं समर्पितवान्।

**प्रो. विजयकुमारजैनः** – लखनऊपरिसरे बौद्धदर्शनविभागाध्यक्षः अयं "बौद्धदर्शनेषु अनेकतायामेकता" इत्यस्मिन् विषये पत्रवाचनं कृत्वा पञ्चदशे विश्वसंस्कृतसम्मेलने प्रतिभागम् अगृह्णात्।

**डॉ. अवनीश अग्रवाल** – लखनऊपरिसरे शिक्षाशास्त्रविभागे सहाचार्या लखनऊविश्वविद्यालये फरवरीमासे 'सामाजिकविज्ञानेषु सांख्यिकीयता' इत्यस्मिन् विषये समायोजितायां सङ्गोष्ठ्यां गृहीतवती।

**डॉ. अवधेशकुमारचौबे** – लखनऊपरिसरे बौद्धदर्शनविभागे सहाचार्यः अयं विश्वसंस्कृतसम्मेलने "अविज्ञप्तिविमर्शः" इत्यस्मिन् विषये शोधपत्रवाचनमकरोत्।

**डॉ. बच्चाभारती** – लखनऊपरिसरे शिक्षाशास्त्रविभागे सहाचार्यः सम्पूर्णानन्दसंस्कृतविश्वविद्यालये मार्चमासस्य अष्टादशदिनाङ्के मूल्यशिक्षामधिकृत्य शोधपत्रं प्रास्तौत्।

**डॉ. देवीप्रसादद्विवेदी** – लखनऊपरिसरे शिक्षाशास्त्रविभागे सहाचार्यः सम्पूर्णानन्दसंस्तविश्वविद्यालये समायोजितायां राष्ट्रियसङ्गोष्ठ्यां "मूल्यशिक्षायां परिवारस्य समाजस्य विद्यालयस्य च योगदानम्" इति विषयमाधृत्य शोधपत्रं समुपस्थापयत्।

**डॉ. गणेशशङ्करविद्यार्थी** – लखनऊपरिसरे शिक्षाशास्त्रविभागे सहाचार्यः फरवरीमासे लखनऊविश्वविद्यालये पुनश्चर्यापाठ्यक्रमे भागमगृह्णात्। सहैव सम्पूर्णानन्दसंस्कृतविश्वविद्यालये मार्चमासस्य अष्टादशदिनाङ्के मूल्यशिक्षामधिकृत्य शोधपत्रमपि प्रास्तौत्।

**डॉ. सुरेशप्रकाशसिंहः** – आधुनिकविषयविभागे सहायकाचार्योऽयं लखनऊविश्वविद्यालयस्य अर्थशास्त्रविभागस्य राष्ट्रियसङ्गोष्ठ्यां निर्धनतोन्मूलनविषयमधिकृत्य शोधपत्रं प्रास्तौत्।

**डा. अजयकुमारमिश्रः** – राष्ट्रियसंस्कृतसंस्थानमुख्यालये सहायकाचार्योऽयं अहमदाबादस्थ– गुजरातसंस्कृताकादम्याः राष्ट्रियसंस्कृतकविसम्मेलने १७.०३.२०१२ दिनाङ्के 'कथं' 'भूकम्पो नानुभूतः' चेति काव्ययोः वाचनमकरोत्। नवदिल्लीस्थ–हिन्दूमहाविद्यालये विश्वविद्यालयानुदानायोगसहयोगेन २३–२४ फरवरी, २०१२ दिनाङ्के आयोजितायां राष्ट्रियसङ्गोष्ठ्यां 'द डाइलेम्मा आफ इम्पावरमेण्ट इन द प्ले सुशीला आफ राधावल्लभत्रिपाठी' इति शोधपत्रं प्रास्तौत्। कोलकातास्था–नरेन्द्रपुरे फरवरीमासे ०२–०३ दिनाङ्कयोः विश्वविद्यालयानुदानायोगेनसहयोगेन रामकृष्णमिशनमहाविद्यालयेन आयोजितायां सङ्गोष्ट्यां 'ए वर्ड्स् आई क्यू : रवीन्द्ररूपकाणि' इति शोधपत्रं प्रास्तौत्।

**डा. त. महेन्द्रः** – संस्थान मुख्यालये सहायकाचार्योऽयं पञ्चदशविश्वसंस्कृतसम्मेलनावसरे 'पत्रमूल्याङ्केषु संस्कृतम्' नाम्ना विविधदेशीयानां पत्रमूल्याङ्कानां सङ्कलनात्मिकां प्रदर्शिनीं समायोजयत्।

## राजीवगान्धीपरिसरस्य वार्ता:



अन्ताराष्ट्रियसङ्गोष्ठ्याः उद्घाटनस्य किञ्चन दृश्यम्

**ऐच्छिकगुणाङ्कपाठ्ययक्रमस्य उद्घाटनम्** – १५.०१.१२ तमे दिनाङ्के परिसरे ऐच्छिकगुणाङ्कपाठ्यक्रमस्य उद्घाटनम् डा. सत्यवती त्रिपाठिवर्याभिः विहितम्।

**अन्ताराष्ट्रियसंगोष्ठी** – १५.०१.१२ तमे दिनाङ्के वैश्विकवैचारिकसम्पत्तेः अभिवर्धने संस्कृतस्य योगदानम् इतीदं तत्त्वमवलम्ब्य आयोज्यमानायाः अन्ताराष्ट्रियसङ्गोष्ठ्याः समुद्घाटनं जगद्गुरुभिः श्रीश्रीभारतीतीर्थमहास्वामिभिः कृतम्। वैदेशिकाः भारतीयाश्च अष्टादशविद्वांसः दिनद्वयव्यापिनि कार्यक्रमेऽस्मिन् विविधेषु विषयेषु शोधपत्राण्यपाठिषुः।




राजीवगान्धीस्मारकमन्ताराष्ट्रिय व्याख्यान कुर्वन् आचार्यः जार्ज कार्डोना

**राजीवगान्धिस्मारकम् अन्ताराष्ट्रियं व्याख्यानम्** – १५.०१.१२ तमे दिनाङ्के कुलपतेः आचार्य राधावल्लभत्रिपाठिनः आध्यक्षे राजीवगान्धिस्मारकम् अन्ताराष्ट्रियं व्याख्यानं प्रो. जार्ज् कार्डोनावर्यैः कृतम्।




वार्षिकोत्सवावसरे भाषमाणः आचार्यःके.बी.सुब्बरायुडुः मञ्चे श्रीश्रीभारतीतीर्थमहास्वामिनः

**वार्षिकोत्सवः** – २३.०१.१२ तमे दिनाङ्के प्रातः नववादने प्राचार्यस्य वेम्पटिकुटुम्बशास्त्रिणः आध्यक्षे दक्षिणाम्नायश्री शारदापीठाधीश्वराः श्रीश्रीभारतीतीर्थमहास्वामिनः श्रीमठीयगुरुभवने परिसरवार्षिकोत्सवस्य उद्घाटनं व्यदधुः यत्र संस्थानकुलसचिवः के.बि. सुब्बरायुडु अभ्यागतः आसीत्।

## गुरुवायूर्परिसरे आयोजिताः कार्यक्रमाः



**अन्ताराष्ट्रिया व्याकरणकार्यशाला** – गुरुवायूर्परिसरे वाक्यपदीये अन्ताराष्ट्रिया द्विदिवसीया कार्यशाला तथा **"पाणिनीये अभिनवगवेषणानि"** इति विषये व्याख्यानक्रमश्च जनवरी २३, २४ दिनाङ्कयोः समपद्येताम्। अमेरिकादेशे पेन्सिल्वेनिया विश्वविद्यालये अध्यापनकर्मणः निवृत्तः विश्वविख्यातः वैयाकरणः प्रो. जार्ज् कार्डोना महोदयः परिसरे नवनिर्मितं शीतीकृतसभागारं स्वकरकमलाभ्यां समुद्घाट्य छात्रान् वाक्यपदीयमपाठयत्। पाणिनीये स्वोपज्ञं गवेषणं चाविरकरोत्। षष्टिः स्नातकोत्तरीयाः छात्राः नानाकलाशालाविश्वविद्यालयेभ्यः समेत्य भागमग्रहीषुः। गुरुवायूर्परिसरीयप्राचार्यस्य प्रो. एम्. ए. बाबु महोदयस्य आध्यक्ष्ये संवृत्ते समापनकार्यक्रमे राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवः प्रो. के. वि. सुब्बरायुडुमहोदयः मुख्यातिथिपदमलङ्कृत्य भागग्राहिभ्यः छात्रेभ्यः प्रमाणपत्राणि प्रादात्। अस्याः कार्यशालायाः निदेशकः प्रो. चल्ला. लक्ष्मीनारायणशर्ममहोदयः तथा संयोजकः डा. एस्. सुब्रह्मण्यशर्ममहोदयश्चाभवताम्।

**विशिष्टव्याख्यानानि** – गुरुवायूर्परिसरे ऐषमः विविधशास्त्रेषु विशिष्टव्याख्यानानि मार्च् मासे १५ तः १९ मिते काले समायोजितानि। आदौ शिक्षाशास्त्रविभागे **अधिगमविधयः** इति विषयमधिकृत्य कालिकट् विश्वविद्यालयाधीने प्रशिक्षणमहाविद्यालये निदेशकः प्रो. सलीम् कुमार् उपन्यास्थत्। न्याये **प्रमाणानि** इति विषये कालडिस्थ श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालये भूतपूर्वन्यायविभागाध्यक्षा प्रो. टि. आर्यादेवी व्याख्यानं व्यधात्। १६ तमे दिनाङ्के तृपुणित्तुरा सर्वकारीयसंस्कृतकलाशालायाः भूतपूर्वप्राचार्या प्रो. के.एम्. ममीनाम्बाल् **वैयाकरणरीत्या आख्यातार्थविचारः** इति विषये अभाषत। **बेल्लंकोण्डरामरायकवेः कृतयः अद्वैतवेदान्तसिद्धान्तश्च** इति शीर्षके ओस्मानिया विश्वविद्यालयीयः प्रो. ए.रामुलु, तथा **भारतीयपारम्पर्ये काव्यनिरूपणसरणिम**धिकृत्य श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालये साहित्यविभागाध्यक्षः प्रो. पि.सि. मुरलीमाधवन् च व्याख्यानमकुरुताम्। विशिष्टव्याख्यानेषु तत्तद्विभागाध्यक्षैः आध्यक्ष्यं निर्व्यूढम्।

**तत्त्वचिन्तामणिविषयिणी राष्ट्रियकार्यशाला** – गुरुवायूर्परिसरे मार्च् मासे २० तः २६ पर्यन्तम् तत्त्वचिन्तामणिशब्दखण्डविषयिणी सप्तदिवसीया राष्ट्रियकार्यशाला न्यायविभागेन समायोजिता। देशस्य विभिन्नप्रान्तेभ्यः समागताः चतुस्त्रिंशत् शोधच्छात्राः प्राध्यापकाश्च तस्यां

भागमग्रहीषुः।

**पि.टि.कुरियाक्कोस् संस्मारकं व्याख्यानम्**– प्रतिवर्षं गुरुवायूर् परिसरे पि.टि.कुरियाक्कोस् स्मारकं व्याख्यानम् प्रचाल्यते। ऐषमः तृतीयं स्मारकव्याख्यानम् २३.०२.१२ दिनाङ्के परिसरस्य सभागारे समायोज्यत। भारतराष्ट्रपतिपुरस्कृतः गुरुवायूर्केन्द्रीयविद्यापीठस्य प्राचार्यरः वेदान्तादिविविध- विद्याविशारदः प्रो.वि.स्वामिनाथन् अखण्डार्थविचारः इति विषयमधिकृत्य व्याख्यानमकरोत्।

**गुरुवायूर्परिसरस्य अभिनवान्तर्जालपुटाविष्करणम्**– २७.०२.२०१२ दिनाङ्के भारतशासनमानवसंसाधनविकासमन्त्रालये भाषाविभागे अवरसचिवः डा.जेराल्ड् गुरुवायूर् परिसरस्य www.sanskritguruvayoor.org इति सङ्केतितमभिनवान्तर्जालपुटम् आविरकरोत्। परिसरीयसङ्गणकशिक्षाविभागीयाभ्यां कुमारी. पि.एस्. मणिचित्रा, कुमारी एन्.वि.दिव्या इत्याभ्यां विदुषीभ्यां सज्जीकृतमिदमन्तर्जालपुटं प्रेक्षकाणां सुदर्शं विराजते। प्राचार्यः, नानाविभागाध्यक्षाः, कार्यालयप्रमुखश्च कार्यक्रमे उपस्थिताः अभवन्। परिसरीयान्तर्जालपुटे परिसरीयाणां शैक्षिकादिकार्यक्रमाणां विभागानां प्रशासनस्य च विषये अपेक्षितं विवरणं द्रष्टुं शक्यते।



## वेदव्यासपरिसरस्य वार्ताः

**नवीनभवनप्रवेशसमारोहः** – वेदव्यासपरिसरः चतुर्दशवर्षेभ्यः भाटकगृहे गरलीग्रामे प्रचलन्नासीत्। साम्प्रतं बलाहरग्रामे सार्धत्र्योदशकोटिधनराशिव्ययेन नवीनभवनस्य निर्माणकार्यं सम्पन्नम्। नवीनभवनस्य प्रथमपर्याये शैक्षणिकभवनं, प्राशासनिकभवनं, वाहनावासः अल्पाहारगृहमित्यादीनां सुशोभनरीत्या निर्माणं समजनि। माघशुक्लपञ्चम्यां १८.०१.२०१२ दिनाङ्के परिसरपरिवारः महता समारोहेण नवीनभवने प्राविशत्। समारोहेऽस्मिन् भूतपूर्वसांसदः मन्त्रिवर्या डॉ. सरोजनीमहिषी, संस्थानकुलसचिवः आचार्यः के. बी. सुब्बरायुडुः च आतिथ्यं निरवहत्। परिसरनिर्माणे सहाय्यभूतेभ्यः ससम्मानं स्मृतिचिह्नानि, उत्तरीयवस्त्राणि च प्रादीयन्त।




**विशिष्टव्याख्यानमालाः** – १. **वेदान्तविभागस्य** – वेदव्यासपरिसरे वेदान्तविषये विशिष्टव्याख्यानमाला समायोजिता। २४.०२.२०१२ दिनाङ्के वेदान्तशास्त्रे लब्धप्रतिष्ठाः विद्वांसः संस्थानकुलसचिवः आचार्यः के.बी.सुब्बरायुडुः च वेदान्तशास्त्रस्य परिचयः प्रयोजनं चेति विषयमाधारीकृत्य स्वकीयं महत्त्वपूर्णम् उपन्यासं प्रादुः।


**२. ज्यौतिषविभागस्य** – ०२.०३.२०१२ दिनाङ्के देहलीस्थ–लालबहादुरशास्त्रिविश्वविद्यालयस्य ज्यौतिषविभागाचार्यः आचार्यः देवीप्रसादत्रिपाठी विशिष्टव्याख्यातृत्वेन समुपागतः।

**३. साहित्यविभागस्य** – १३.०३.२०१२ दिनाङ्के साहित्यविभागेन विशिष्टं व्याख्यानं समायोजि।

**४. महिलासंस्कृताध्ययनकेन्द्रस्य** – १३.०३.२०१२ दिनाङ्के महिलासंस्कृताध्ययनकेन्द्रेण आयोजितः विशिष्टव्याख्यानमालासमारोहः। ढलियारास्थराजकीयमहाविद्यालयस्य आचार्यया आचार्यमधुशर्मया सन्दर्भेऽस्मिन् महिलासशक्तिकरणमिति विषयमवलम्बय उपन्यासः प्रस्तुतः।

## मधुरान्तक-आदर्शमहाविद्यालयस्य वार्षिकोत्सवः

मधुरान्तकस्थ–श्रीमदहोबिलमठीय–आदर्शसंस्कृतमहाविद्यालयस्य सप्ततितमः वार्षिकोत्सवः मार्चमासस्य चतुर्थदिनाङ्के भानुवासरे प्राचलत्। तस्मिन् उत्सवे पुदुच्चेरिविश्वविद्यालयस्य संस्कृतप्राध्यापकः प्रो. का. ई. धरणीधराचार्यः विशेषाथितित्वेन उपस्थितः क्रीडास्पर्धायां शैक्षिक–स्पर्धायाञ्च छात्रान् पुरस्कृत्य संस्कृतस्य, संस्कृतछात्राणां च वैशिष्ठ्यमधिकृत्य विशेषभाषणमकरोत्। अत्र कलाशालाच्छात्राणां सांस्कृतिककार्यक्रमाः अपि आसन्। तत्र छात्राः नाटकादिकं सङ्गीतगाननृत्यविशेषादिकं च कृत्वा स्वसामर्थ्यातिशयविशेषेण सर्वान् अनन्दन्। अस्य महाविद्यालयस्य प्रांशुपालः डा. एस्. वरगोपालकृष्णन् विशेषाथितीन् सम्मानितवान्। वाग्वर्धिनीपरियोजनायाः अस्य वार्षिकोत्सवस्य च संयोजकः न्याय–उपप्राध्यापकः श्री. स. सुदर्शनन् सर्वेभ्यः धन्यवादान् समर्पितवान्।



## लखनऊपरिसरस्य वार्ताः

**गणतन्त्रदिवसः-** भारतसंघस्य संविधानाङ्गीकरणदिवसस्मृतौ परिसरप्राङ्गणे २६.०१.२०१२ इत्यस्मिन्नहनि समाचरितो गणतन्त्रदिवसः। प्राचार्येण प्रो. सुरेन्द्रझामहोदयेन ध्वजारोहणं विहितम्। तत्र राष्ट्रस्य वर्तमानस्थितिं संलक्ष्य कर्तव्याकर्तव्यदिशाबोधः शिक्षकेभ्यः कर्मचारिभ्यः छात्रेभ्यश्च दत्तः।

**शैक्षिकयात्रा-** मार्चमासस्य त्रयोदशदिनाङ्कतः पञ्चदशदिनाङ्कं यावत् शिक्षाशास्त्रविभागस्य शैक्षिकयात्रा डा. बच्चाभारती महोदयस्य (सहाचार्यः, शिक्षाशास्त्रविभागे) संयोजने सञ्जाता। अस्यां शैक्षिकयात्रायां भगवल्लीलाभूमौ मथुरावृन्दावने कालिन्दीकूले छात्रशिक्षकैः कश्चन विशेष एव आध्यात्मिकानुभवः सम्प्राप्तः। यात्रायाः समाप्तौ ऐतिह्यज्ञानाय छात्रशिक्षकैः ताजमहलभवनमपि दृष्टम्।

**समायोजिताः व्याख्यानमालाः-** अस्मिन् मासत्रयावधौ परिसरे बहूनां व्याख्यानानामायोजनं सञ्जातम्। तद्यथा- शिक्षाशास्त्रविभागे आचार्यो वाचस्पतिद्विवेदी, व्याकरणविभागे प्रो. रामसागरमिश्रः, साहित्यविभागे प्रो. रेवाप्रसादद्विवेदी, ज्यौतिषविभागे प्रो. रामचन्द्रझा, बौद्धदर्शनविभागे प्रो. एस.पी. नारंग चेत्येते पण्डिताः स्वशास्त्रे विषयनिरूपणमकुर्वन्। विस्तारव्याख्यानरूपे जैनविश्वभारतीतः समागतानां डॉ. आनन्दप्रकाशत्रिपाठिमहोदयानां व्याख्यानम् 'अहिंसा वीरता च' विषयेऽस्मिन् जातम्।

तत्रैव २०.०३.२०१२ दिनाङ्के डा. भीमराव-अम्बेडकरव्याख्यानमालान्तर्गतं प्रो. उमाशंकरव्यासमहोदयस्य (निदेशकचरः, नवनालन्दामहाविहारः, नालन्दा) पण्डितगोपीनाथकविराजस्मृतिव्याख्यानमालान्तर्गतञ्च प्रो. कालियामहोदयस्य उद्बोधनं सञ्जातम्। अस्मिन्नेव कार्यक्रमे मन्त्रालयस्य संयुक्तसचिवेन डॉ. अनन्तकुमारमहोदयेनापि संस्कृतस्य प्रोन्नत्यै विदुषां विद्यार्थिनाञ्च आह्वानं विहितम्। परिसरस्य प्राचार्येण प्रो. सुरेन्द्रझामहोदयेन समागतानां विदुषां स्वागतवचोभिः सम्माननं विहितम्।

**समायोजिताः कार्यशालाः-** परिसरे पालि-अध्ययनकेन्द्रे पालित्रिपिटकानां संस्कृतछायाङ्कनयोजनान्तर्गतं १६ मार्चतः २९ मार्चपर्यन्तं चतुर्दशदिवसीया कार्यशाला प्रो. विजयकुमारजैनमहोदयस्य, डॉ.अवधेशकुमारचौबेमहोदयस्य डॉ. गुरुचरणसिंहनेगी महोदयस्य च संयोजकत्वे प्रावर्तत। कार्यशालायां समागतेषु विद्वत्सु पद्मश्रीः प्रो. रामशङ्करत्रिपाठी, प्रो.जानकीप्रसादद्विवेदी (वाराणसी), प्रो. एस. पी. नारंगः, प्रो. संघसेनसिंहः (दिल्ली), प्रो. उमाशङ्करव्यासः (नालन्दा), प्रो. जगतरामभट्टाचार्यः (लाडनू), प्रो.कमलकुमारजैनः (पूना), प्रो. वृषभप्रसादजैनः, प्रो.रामसागरमिश्रः इत्येते प्रमुखाः आसन्। कार्यशालायामस्यां नवग्रन्थानां संशोधनं सम्पादनं च सम्पन्नम्। एते ग्रन्थाः अधुना प्रकाशनाधीनाः वर्तन्ते।

पाठ्यक्रमे गुणवत्तावर्धनदिशा आधुनिकविषयविभागे हिन्दीविषयस्य एका त्रिदिवसीया कार्यशालापि मार्चमासस्य १६ दिनाङ्कतः २२ दिनाङ्कं यावत् सञ्जाता। कार्यशालायां प्रो. शिशिरकुमारपाण्डेयमहोदयस्य संयोजने डॉ. रमेशकुमारः डॉ. उमाकान्तचौबे डॉ. कमलानन्ददत्तश्च संस्थानस्य हिन्दीविषयस्य पाठ्यक्रमम् अरचयन्।



**वार्षिकोत्सवः-** २७.०३.२०१२ इत्यस्मिन् अहनि परिसरस्य वार्षिकोत्सवः सम्पन्नः। कार्यक्रमेऽस्मिन् सभाध्यक्षत्वेन राजस्थानसंस्कृतविश्वविद्यालयस्य कुलपतिचरः प्रो. सत्यदेवमिश्रः, मुख्यातिथित्वेन संस्थानकुलसचिवः प्रो. के. बी. सुब्बारायुडुः सारस्वतातिथित्वेन आचार्यो रेवाप्रसादद्विवेदी च सभां व्यभूषयन्। परिसरप्राचार्येण प्रो. सुरेन्द्रझामहोदयेन सस्वागतं वार्षिकं प्रतिवेदनं प्रस्तुतम्। सत्रेऽस्मिन् विविधपरीक्षासु स्पर्धासु च स्थानभाजो विद्यार्थिनः पुरस्कारैः सभाजिताः। कार्यक्रमसञ्चालनं प्रो. लक्ष्मीनिवासपाण्डेयः धन्यवादज्ञापनं प्रो. सुरेन्द्रपाठकः च अकुरुताम्।



## भोपालपरिसरस्य भवननिर्माणकार्यस्य प्रथमचरणं सम्पन्नम्

भोपालपरिसरस्य भवननिर्माणस्य प्रथमचरणस्य कार्यं सुसम्पन्नं वर्तते। द्वितीयचरणस्य कार्यं साम्प्रतं प्रचलदस्ति। पार्श्वे तस्य चित्रद्वयं दृश्यते।



## प्रकटिता ५१तमाया अखिलभारतीयशास्त्रीयस्पर्धायाः नियमावलिः

भारतशासनपक्षतः राष्ट्रियसंस्कृतसंस्थानेन संस्कृतविश्वविद्यालयेषु पारम्परिकसंस्कृतशिक्षणसंस्थासु गुरुकुलेषु वा शास्त्राणि अधीयानानां प्रतिभां प्रोत्साहयितुं, तेषां विकासाय च प्रतिवर्षम् अखिलभारतीय-शास्त्रीयस्पर्धा आयोज्यते। आरम्भवर्षेषु अखिलभारत-संस्कृतभाषणस्पर्धा इति व्यवहृतः अयं कार्यक्रमः सम्प्रति भाषणेतर-शास्त्रीयस्पर्धानामपि संयोजनात् अखिलभारत-शास्त्रीय-स्पर्धा-नाम्ना व्यवह्रियते। अस्य स्पर्धायोजनस्य ५१तमः कार्यक्रमः हिमाचले गरली इत्यत्र प्रतिष्ठिते राष्ट्रियसंस्कृतसंस्थानस्य वेदव्यासपरिसरे आयोजयिष्यते। विद्वद्भिः सह समालोच्य, अस्मिन् पर्याये भाषणस्पर्धायाः शास्त्रार्थविचारस्पर्धायाश्च स्वरूपमीषत् परिष्कृतम्। गतेषु वर्षेषु अन्त्याक्षरी इति व्यवहृता स्पर्धा स्पर्धास्वरूपानुसारेण ऐषमः पर्याये अक्षरश्लोकीनाम्ना व्यह्रियते। तस्याः स्पर्धायाः निमित्तं निर्दिष्टग्रन्थसूच्यां नूतनाः केचन ग्रन्थाः संयोजिताः। सर्वासां स्पर्धानां पुरस्कारराशिरपि संवर्धितः। अखिलभारतीय-स्पर्धानां राज्यस्तरीयस्पर्धानां च विवरणसहिता नियमावलिः, नामाङ्कनप्रपत्राणि च पुस्तककाररूपेण प्रकाशिता संस्थानजालपुटे (www.sanskrit.nic.in) च स्थापिता वर्तते। स्पर्धासु भागग्रहणार्थं समुत्सुका युवानः पण्डिताः स्वस्वसंस्थामाध्यमेन नामाङ्कनं कारयेयुः। ५१ तमाया स्पर्धायाः विषयाः इत्थं वर्तन्ते-

### I. भाषणस्पर्धा

**वेदान्तभाषणम्** - वेदान्तपरिभाषा (अनुमानपरिच्छेदान्ता)

**धर्मशास्त्रभाषणम्** - याज्ञवल्क्यस्मृतेः व्यवहाराध्यायः (विज्ञानेश्वरकृत-मिताक्षरासहितः)

**ज्यौतिषभाषणम्** - लघुजातकम् (पूर्णम्)

### II. शलाकापरीक्षा

**साहित्यशास्त्रशलाकापरीक्षा - काव्यप्रकाशः** 1 तः 5 उल्लासाः

**व्याकरणशलाकापरीक्षा - वै.सिद्धान्तकौमुदी** आदितः कारकप्रकरणान्ता

**न्यायशलाकापरीक्षा - व्युत्पत्तिवादः** (प्रथमाकारकान्तः)

**ज्यौतिषशलाकापरीक्षा - सूर्यसिद्धान्तः** (आदितः त्रिप्रश्नाधिकारं यावत्)

**वेदान्तशलाकापरीक्षा - वेदान्तपरिभाषा** अनुमानपरिच्छेदान्ता

**पुराणेतिहासशलाकापरीक्षा - श्रीमद्भगवद्गीता**

**मीमांसाशलाकापरीक्षा - अर्थसङ्ग्रहः**

### III. कण्ठपाठस्पर्धा

**काव्यकण्ठपाठः** - रघुवंशः 1-5 सर्गाः

**अमरकोषकण्ठपाठः** - (सम्पूर्णः अमरकोषः)

**अष्टाध्यायीकण्ठपाठः** - (सम्पूर्णा अष्टाध्यायी)

**धातुरूपकण्ठपाठः** - कपिलदेवद्विवेदिप्रणीतप्रौढरचनानुवादकौमुद्यां प्रदर्शितानां 100 धातूनां दशसु लकारेषु सर्वाणि रूपाणि। (पुस्तकान्ते द्रष्टव्यम्)

**शास्त्रार्थविचारः** - (भारतीयदर्शनेषु प्रमाणस्वरूपविमर्शः)

### IV. समस्यापूर्तिः अक्षरश्लोकी च

**अक्षरश्लोकी**

गतेषु वर्षेषु अन्त्याक्षरी इति व्यवहृतायाम् अस्यां स्पर्धायाम् अधोनिर्दिष्टग्रन्थेभ्यः एव श्लोकाः स्वीकरणीयाः-१. स्वप्नवासवदत्तम्, २. रघुवंशम्, ३. कुमारसम्भवम्, ४. बुद्धचरितम् (अश्वघोषस्य) ५. सौन्दरानन्दम् (अश्वघोषस्य) ६. किरातार्जुनीयम्, ७. अभिज्ञानशाकुन्तलम्, ८. विक्रमोर्वशीयम्, ९. मालविकाग्निमित्रम्, १०. मेघदूतम्, ११. नैषधीयम्, १२. उत्तररामचरितम्, १३. शिशुपालवधम्, १४. मृच्छकटिकम्, १५. मुद्राराक्षसम्। १६. भर्तृहरेः सुभाषितत्रिशती, १७. गङ्गाधरशास्त्रिप्रणीतः अलिविलासिसंलापः, १८. श्रीशङ्करभगवत्पादविरचिता सौन्दर्यलहरी, १९. पण्डितराजजगन्नाथस्य पञ्च लहर्यः गंगालहरी (पीयूषलहरी), अमृतलहरी, करुणालहरी (विष्णुलहरी), लक्ष्मीलहरी, सुधालहरी, २०. पण्डितराजजगन्नाथविरचित-भामिनीविलासः, २१. रमाकान्तशुक्लविरचितं 'भाति मे भारतम्', एतेभ्यः ग्रन्थेभ्यः सर्वे श्लोकाः स्वीकर्तुं शक्यन्ते।

अधिकविवरणाय अत्र सम्पर्कं कर्तुं शक्नुवन्ति-

**आचार्यः के.बी.सुब्बारायुडु**
कुलसचिवः, राष्ट्रिय-संस्कृत-संस्थानम्
56-57 इन्स्टीट्यूशनल्-एरिया
जनकपुरी, नवदेहली - 110058
दूरभाष : 011-28521994, 28520979
फेक्स्- 28520976, 28524387

**कू.वेङ्कटेशमूर्तिः**
(सहायकाचार्यः, मु.स्वा.पी.)
संयोजकः, अखिलभारतीयशास्त्रीयस्पर्धा
दूरभाष : 011-28524993, 09868256044,
E-mail : kuvemoorthy@gmail.com


वर्षम् ३ अङ्कः १०

संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्


वर्षम् ३ अङ्कः ११

संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

# संस्कृतवार्तायाः कृते आमन्त्र्यन्ते वार्ताः

राष्ट्रियसंस्कृतसंस्थानस्य 'संस्कृतवार्ता'भिधेये त्रैमासिके वार्तापत्रे साम्प्रतं संस्कृतजगतो विशिष्टाः घटनाः कार्यक्रमाश्चापि प्रकाश्यन्ते। विश्वविद्यालयेषु विभागेषु संस्थासु विद्यालयेषु महाविद्यालयेषु संस्कृतसङ्घटनेषु च प्रतिमासत्रये (जनवरी-मार्च, अप्रैल-जून, जुलाई-सितम्बर, अक्टूबर-दिसम्बर इति कालक्रमेण) संवृत्ताः संस्कृतसम्बद्धाः घटनाः कार्यक्रमाः च अत्र प्रकाशनार्थं प्रेषयितुं शक्नुवन्ति।

सर्वा वार्ताः प्रमाणिक्यः, विवादरहिताः, तथ्यपरकाश्च भवेयुः। प्रेषितासु वार्तासु यथावश्यकं सम्पादकः संशोधनं कर्तुम् अर्हति।

Walkman Chankya 905 इति गात्रे (Font मध्ये) टङ्किताः वार्ताः चित्राणि च samskritavarta@gmail.com इति मेलसङ्केते प्रेषयन्तु। डाकमाध्यमेन प्रेषयितुमिच्छन्ति चेत् अधोनिर्दिष्टसङ्केते प्रेषयन्तु-


सम्पादकः

**संस्कृतवार्ता**

**राष्ट्रियसंस्कृतसंस्थानम्**

(मानितविश्वविद्यालयः)


५६-५७, इन्स्टीट्यूशनल एरिया, डी-ब्लाक,



वर्षम् ३

संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्


संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्


Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol. IV Issue No.15 Pub. by the Registrar for Rashtriya Sanskrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007